
SPEAK SANSKRIT
The Easy Way

# वाग्देवीस्तुतिः

यामृष॑यो मन्त्र॒कृतो॑ मनी॒षिण॑ः
अ॒न्वैच्छ॑न् दे॒वास्तप॑सा॒ श्रमे॑ण।
तां दे॒वीं वाचं॑ ह॒विषा॑ यजामहे
सा नो॑ दधातु सुकृ॒तस्य॑ लो॒के॥

तैत्तिरीय-ब्राह्मणम् II. 8. 8

Whom the Sages, the Makers of Hymns, the Wise Ones,
And the Gods also, sought with Fervour and with Effort,
Her, the Divine Speech, with this offering we pray,
May She vouchsafe Welfare unto the World.



# जागृहि संस्कृत

जागृहि संस्कृत ! जागृहि भारत !
जागृहि संस्कृत तूर्णम् ।
निखिल-भुवन-जन-मानस-गगनं
कुरु महसा परिपूर्णम् ॥
हे भारति निज-विश्वविमोहन-
वीणा-नाद-तरङ्गम्।
सारय मानव-दानव-हृदये
कुरु तत् सरस-सरङ्गम् ॥
प्रतिवदनं विलसतु सुरभाषा
ऋषि-मुनि-कविवर-मान्या ।
जयतु परा माता भुवि जयतात्
संस्कृतवाणी धन्या ॥

## जागृहि संस्कृत

जागृहि संस्कृत ! जागृहि भारत !
जागृहि संस्कृत तूर्णम् ।
निखिल-भुवन-जन-मानस-गगनं
कुरु महसा परिपूर्णम् ॥
हे भारति निज-विश्वविमोहन-
वीणा-नाद-तरङ्गम्।
सारय मानव-दानव-हृदये
कुरु तत् सरस-सरङ्गम् ॥
प्रतिवदनं विलसतु सुरभाषा
ऋषि-मुनि-कविवर-मान्या ।
जयतु परा माता भुवि जयतात्
संस्कृतवाणी धन्या ॥

# प्रथमाभ्यासः

Test your understanding. English translation and exercises on page 28.

गीता – सुदिनम् आर्य ![1]

शिक्षकः – सुदिनं गीते ! अपि सर्वं कुशलम् ?[2]

गीता – आम् आर्य, सर्वं कुशलम्। एषा मम सखी संस्कृते भाषणं कर्तुम् इच्छति।[3]

शिक्षकः – एवम् ?[4]

गीता – आम् आर्य ![5]

शिक्षकः – उत्तमः कल्पः। अस्याः नाम किम् ?[6]

गीता – *(सखीं प्रति)* कथय, स्वनाम कथय ?[7]

माधुरी – मम नाम माधुरी।[8]

शिक्षकः – मधुरं नाम, सुन्दरं नाम। अस्याः पितुः नाम सरोजः मन्ये।[9]

गीता – आम् आर्य ! भवान् कथम् अजानात् ?[10]

शिक्षकः – मुखसादृश्यात्। सः मम सहपाठी आसीत्। *(माधुरीं प्रति)* तव निवासः कुत्र ?[11]

माधुरी – निकटे, अर्धक्रोशक-दूरे।[12]

शिक्षकः – माधुरि, त्वं तु संस्कृतं वदसि ![13]

गीता – आर्य, एषा विद्यालये वर्षद्वयं पठितवती। किन्तु अस्याः भयम् अस्ति।[14]

शिक्षकः – भयम् अस्ति ? कस्मात् ? भाषणात् ?[15]

माधुरी – न हि। व्याकरणात्। अहं रटितुं न शक्नोमि।[16]

शिक्षकः – रटनं न आवश्यकम्।[17]

गीता – आर्य, तदेव अहम् अकथयम्। एषा विश्वासं न करोति।[18]

शिक्षकः – माधुरि, त्वम् अस्माकं पद्धतिं पश्य। यदि न रोचते, न आगच्छ।[19]

गीता – आर्य, एषा कदा आगच्छेत् ?[20]

शिक्षकः – श्वः आगन्तुं शक्नोति।[21]

गीता – श्वः कदा ?[22]

शिक्षकः – प्रभाते सप्तवादने। *(माधुरीं प्रति)* आगन्तुं शक्नोषि ?[23]

माधुरी – आम् आर्य, आगमिष्यामि।[24]

शिक्षकः – साधु। भयं मा कुरु। अहं न ताडयिष्यामि।[25]

माधुरी – अनुगृहीतास्मि। नमोऽस्तु आर्य ![26]

शिक्षकः – नमस्ते। पुनर्दर्शनाय।[27]



# द्वितीयाभ्यासः

Fill in the blanks with any of the following words given within brackets.
English translation, answers and exercises on page 29.

[कलाकारः, चित्रकारः, नाट्यकारः, स्वर्णकारः, पत्रकारः।]

१. (क) त्वं . . . ? त्वं सत्यं . . . ?
आम्, अहं . . .
तर्हि त्वं . . . असि।
आम्, आम्। अहं . . . अस्मि। कतिवारं कथनीयम् ? अहं . . . अस्मि।

(ख) त्वं . . . ? त्वं सत्यं . . . ?
न, अहं न . . .
त्वं . . . नासि ?
कथयामि, अहं . . . नास्मि। बधिरोऽसि ? श्रोतुं न शक्नोषि ? अहं . . . नास्मि।

(ग) अत्र कोऽपि . . . अस्ति ? भवान् . . . अस्ति ? सः बालकः . . . अस्ति ? अयं बालकः . . . अस्ति ? आश्चर्यम् ! अत्र कोऽपि . . . नास्ति ?

(घ) सः . . . ? सः सत्यं . . . ?
आम्, सः . . .। एषः अपि . . .। मम पिता अपि . . . । तस्य पिता अपि . . .।
अस्य पिता अपि . . . ।

[गणेशः, रमेशः, गोविन्दः, गोपालः, दिलीपः, सन्दीपः।]

२. हॅलो ! भवान् . . . ?
क्षम्यताम्। अहं न . . .। अधुना सः अत्र नास्ति।
कदा आगमिष्यति ?
न जाने।
किं भवान् तस्मै सन्देशमेकं दातुं शक्नोति ?
कथयतु। नूनं दास्यामि।
अद्य सायं सः मम गृहम् आगच्छेत्।
भवतः नाम ?
मम नाम . . . । सः मम सहपाठी, मम दूरभाषसङ्ख्यां जानाति।
अस्तु। कथयिष्यामि।
धन्यवादाः।



# तृतीयाभ्यासः

Make sentences as shown in the third column. Word-meanings on page 35.

| 1 | 2 | 3 |
|---|---|---|
| (क) | पूजक, शिक्षक, चालक, पालक, वादक, साधक, गणक, भक्षक, वाचक, योजक, प्रकाशक, संशोधक, सम्पादक, विचारक, जनक, रन्धक, विनाशक, परिवेषक, प्रचारक, उत्पादक, अध्यापक, अन्वेषक, आलोचक, उद्घोषक, प्रेषक, उद्घाटक। | पूजकः पूजयति।<br>शिक्षकः शिक्षयति।<br>चालकः चालयति।<br>पालकः पालयति। |
| (ख) | गायक, क्रीडक, रक्षक, खादक, खेलक, कृषक, निन्दक, आक्रामक, आकर्षक, प्रशंसक, पर्यटक, सन्तरक। | गायकः गायति।<br>क्रीडकः क्रीडति। |
| (ग) | नायक, पाचक, पाठक, दाहक, जल्पाक, लुण्ठाक, अनुवादक, उद्धारक। | नायकः नयति।<br>जल्पाकः जल्पति। |
| (घ) | क्रोधी, लोभी, कोपी, द्रोही, विद्रोही। | क्रोधी क्रुध्यति। |

Make sentences as shown in the fourth column.

<table>
<tr><th>1</th><th>2</th><th>3</th><th>4</th></tr>
<tr><td>त्वं</td><td rowspan="3">गाय<br>क्रीड<br>रक्ष<br>खाद<br>शिक्षय<br>पूजय<br>नय<br>क्रुध्य</td><td>+सि</td><td>त्वं गायसि।</td></tr>
<tr><td>अहं</td><td>+आमि</td><td>अहं गायामि।</td></tr>
<tr><td>सः बालकः<br>सा बालिका<br>अयं बालकः<br>इयं बालिका<br>भवान्<br>भवती</td><td>+ति</td><td>सः बालकः गायति।<br>सा बालिका गायति।<br>अयं बालकः गायति।<br>इयं बालिका गायति।<br>भवान् गायति।<br>भवती गायति।</td></tr>
</table>

# चतुर्थाभ्यासः

English translation and answers on page 35.

१. त्वं किं पठसि ? अहं . . . पठामि। [संस्कृतम्, मातृभाषाम्, गणितम्, विज्ञानम्, इतिहासम्।]

२. त्वं कथं पठसि ? अहं . . . पठामि। [शीघ्रं शीघ्रम्, मन्दं मन्दम्, शुद्धम्, अशुद्धम्, साधु, असाधु।]

३. त्वं कतिवारं पठसि ? अहं . . . पठामि। [एकवारम्, द्विवारम्, त्रिवारम्, चतुर्वारम्, पञ्चवारम्।]

४. त्वं कुत्र पठसि ? अहं . . . पठामि। [विद्यालये, महाविद्यालये, विश्वविद्यालये, छात्रावासे, गृहे।]

५. त्वं कदा पठसि ? अहं . . . पठामि। [प्रभाते, मध्याह्ने, अपराह्ने, सायङ्काले, रात्रौ, रविवारे।]

६. यूयं किं खादथ ? वयं . . . खादामः। [भक्तम्, दालिम्, तेमनम्, भर्जम्, सन्धितम्, रसगोलम्।]

७. यूयं कुत्र खादथ ? वयं . . . खादामः। [भोजनालये, छात्रावासे, भोजनिलये, गृहे, बन्धुगृहे।]

८. यूयं कियत् खादथ ? वयं . . . खादामः। [उदरपूरम्, अर्धोदरम्, यावत् आवश्यकं तावत्।]

९. यूयं कथं खादथ ? वयं . . . खादामः। [शान्तभावेन, पवित्रमनसा, जिह्वालालसया, इच्छानुसारेण।]

१०. यूयं किमर्थं खादथ ? वयं . . . खादामः। [जीवनधारणाय, स्वास्थ्यलाभाय, क्षुधानिवारणाय।]

# षष्ठाभ्यासः

English translation and answers on page 43.

शिक्षिका – भरतस्य सञ्चिका कुत्र ?[1]
भरतः – आर्ये, एषः ददामि। किञ्चित् अवशिष्टम् अस्ति।[2]
शिक्षिका – शीघ्रं देहि। अत्र श्रद्धायाः सञ्चिकापि नास्ति।[3]
श्रद्धा – आर्ये, मम सञ्चिका लुप्ता।[4]
शिक्षिका – तव सञ्चिका लुप्ता ? कथं लुप्ता ?[5]
श्रद्धा – न जानामि।[6]
शिक्षिका – कुतः नूतन-सञ्चिकां न क्रीणासि ?[7]
श्रद्धा – अद्य क्रेष्यामि आर्ये ! क्षम्यताम्।[8]
शिक्षिका – शान्त्याः सञ्चिकां न पश्यामि। केतक्याः सञ्चिकापि नास्ति।[9]
शान्तिः – आर्ये, मम सञ्चिका अधुनैव समाप्ता। मया अर्धं लिखितम्।[10]
केतकी – ममापि समाप्ता। पश्यतु आर्ये ![11] *(दर्शयति)*
शिक्षिका – अद्यैव नूतन-सञ्चिकां क्रीणीहि। *(शान्तिं प्रति)* त्वम् अपि।[12]
उभे – आम् आर्ये ![13]
शिक्षिका – अभिजितः हस्तलेखं पश्यत। कोऽपि अस्य हस्तलेखं पठितुं शक्नोति ?[14]
अभिजित् – आर्ये, मम हस्तलेखः इत्थम् एव। किं कुर्याम् ?[15]
शिक्षिका – प्रतिदिनं न्यूनतः पृष्ठमेकम् अनुलिख।[16]
अभिजित् – लेखिष्यामि आर्ये ![17]
शिक्षिका – अद्यैव आरम्भं कुरु।[18]
अभिजित् – करिष्यामि।[19]
शिक्षिका – अत्र रवेः मुखं न पश्यामि। सप्ताहात् रघोः दर्शनं नास्ति। किं जातं तयोः ?[20]
छात्राः – वयं न जानीमः।[21]
शिक्षिका – कोऽपि तयोः गृहं जानाति ?[22]
विकासः –अहं जानामि आर्ये ![23]
शिक्षिका – तयोः पितरं सूचय – तौ मां पश्येताम्।[24]
विकासः – सूचयिष्यामि।[25]
शिक्षिका – साधु।[26]

*वाक्यानि रचय। यथा –*

भरतस्य गृहं कुत्र ? श्रद्धायाः गृहं कुत्र ? शान्त्याः गृहं कुत्र ? केतक्याः गृहं कुत्र ? अभिजितः गृहं कुत्र ? रवेः गृहं कुत्र ? रघोः गृहं कुत्र ? भरतस्य पिता कः ? श्रद्धायाः पिता कः ? शान्त्याः पिता कः ? केतक्याः पिता कः? अभिजितः पिता कः ? रवेः पिता कः ? रघोः पिता कः ?

Table 1 →

<table>
<tr><td>भरत</td><td rowspan="4">+</td><td>स्य</td><td rowspan="6">गृहं कुत्र ?<br>पिता कः ?<br>मातृभाषा का ?<br>वयः किम् ?</td></tr>
<tr><td>श्रद्धा</td><td>याः</td></tr>
<tr><td>शान्ति<br>केतकी</td><td>आः</td></tr>
<tr><td>अभिजित्</td><td>अः</td></tr>
<tr><td>रवि</td><td colspan="2" rowspan="2">एः<br>ओः</td></tr>
<tr><td>रघु</td></tr>
</table>

Table 2 →

<table>
<tr><td>भरत</td><td rowspan="4">+</td><td>आत्</td><td rowspan="6">दूरं तिष्ठ।<br>परं वद।<br>पूर्वं न वद।</td></tr>
<tr><td>श्रद्धा</td><td>याः</td></tr>
<tr><td>शान्ति<br>केतकी</td><td>आः</td></tr>
<tr><td>अभिजित्</td><td>अः</td></tr>
<tr><td>रवि</td><td colspan="2" rowspan="2">एः<br>ओः</td></tr>
<tr><td>रघु</td></tr>
</table>

Table 3 →

<table>
<tr><td>भरत* (अ+इ=ए)</td><td rowspan="4">+</td><td>इन</td><td rowspan="4">सह गच्छ।<br>सह न गच्छ।</td></tr>
<tr><td>श्रद्धा* (श्रद्ध)</td><td>या</td></tr>
<tr><td>शान्ति<br>केतकी<br>अभिजित्</td><td>आ</td></tr>
<tr><td>रवि<br>रघु</td><td>णा</td></tr>
</table>

*भरत + इन = भरतेन। श्रद्धा + या = श्रद्धया।

Table 4 →

<table>
<tr><td>भरत</td><td rowspan="6">+</td><td>आय</td><td rowspan="6">मिष्टान्नं देहि।<br>किं रोचते ?</td></tr>
<tr><td>श्रद्धा</td><td>यै</td></tr>
<tr><td>शान्ति<br>केतकी</td><td>ऐ</td></tr>
<tr><td>अभिजित्</td><td rowspan="3">ए</td></tr>
<tr><td>रवि*</td></tr>
<tr><td>रघु*</td></tr>
</table>

*रवि + ए = रवये। *रघु + ए = रघवे।

Table 5 →

<table>
<tr><td>श्रद्धा</td><td rowspan="3">+</td><td>याम्</td><td rowspan="4">अग्निर् ज्वलति।<br>विश्वासं कुरु।<br>विश्वासं न कुरु।</td></tr>
<tr><td>शान्ति<br>केतकी</td><td>आम्</td></tr>
<tr><td>अभिजित्<br>भरत*</td><td>इ</td></tr>
<tr><td>रवि<br>रघु</td><td colspan="2">औ</td></tr>
</table>

*भरत + इ = भरते।

## गीतम्

अहं त्वं सः सा अयम् इयम्, अः। अस्मि, असि।
मां त्वां तं ताम् इमम् इमाम्, अम्। पृच्छ, वद।
मया त्वया तेन तया, इन या ना। किं कृतम् ?
मह्यं तुभ्यं तस्मै तस्यै, आय यै ने। देहि, नमः।
मत् त्वत् तस्मात् तस्याः, आत् याः नः। परं वद।
मम तव तस्य तस्याः, स्य याः नः। नाम वद।
मत् त्वत् तस्य तस्याः, उः एः ओः। किम् इच्छसि ?
मयि त्वयि तस्मिन् तस्याम्, औ याम् नि। ज्वलति अग्निः।

Additional material on pp. 62 and 63.

# सप्तमाभ्यासः

English translation and answers on page 47.

*वाक्यानि रचय। यथा –*

१. अद्य सः पठति ? तेन किम् ?
२. तेऽपि पठन्ति।
३. अहम् अपि पठामि।
४. वयं सर्वेऽपि पठामः।
५. त्वं पठितुम् इच्छसि ?
६. त्वं पठिष्यसि ?
७. त्वं पठ।
८. पठित्वा आनन्दं प्राप्स्यसि।

| | | |
|---|---|---|
| (क) | खाद, खेल, धाव, हस, भ्रम, क्रीड, पत, क्रन्द, निन्द, रट, जल्प, चल, जप, खन, खञ्ज, गर्ज, चर्व, रक्ष, लम्फ। | १. अद्य सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. त्वं . . . (तुम्) इच्छसि ?<br>६. त्वं . . . (स्य) ?<br>७. त्वं . . .<br>८. . . . (त्वा) आनन्दं प्राप्स्यसि। |
| (ख) | कथय, दर्शय, पूजय, स्थापय, रचय, चिन्तय, पातय, क्षालय, ताडय, सूचय, चेतय, बोधय, प्रेषय, पूरय, कम्पय, त्रोटय, मार्जय, वीजय, नाशय, चालय, वादय, रन्धय, धारय, श्रावय, ज्वालय, शिक्षय, घूर्णय, चूर्णय, भोजय, साधय, हासय, पाठय, कारय, स्मारय, हारय, गणय, पालय। | |

१. ह्यः सः अपठत् ? तेन किम् ?
२. तेऽपि अपठन्।
३. अहम् अपि अपठम्।
४. वयं सर्वेऽपि अपठाम।
५. ह्यः त्वम् अपठः ?

| | | |
|---|---|---|
| (क) | खाद, खेल, धाव, हस, भ्रम, क्रीड, पत, क्रन्द, निन्द, रट, जल्प, चल, जप, खन, खञ्ज, गर्ज, चर्व, रक्ष, लम्फ। | १. ह्यः सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. ह्यः त्वम् . . . ? |
| (ख) | कथय, दर्शय, पूजय, स्थापय, रचय, चिन्तय, पातय, क्षालय, ताडय, सूचय, चेतय, बोधय, प्रेषय, पूरय, कम्पय, त्रोटय, मार्जय, वीजय, नाशय, चालय, वादय, रन्धय, धारय, श्रावय, ज्वालय, शिक्षय, घूर्णय, चूर्णय, भोजय, साधय, हासय, पाठय, कारय, स्मारय, हारय, गणय, पालय। | |

# अष्टमाभ्यासः

Corresponding slokas on page 48.

*वाक्यानि रचय। यथा –*

अहं कः ? त्वं कः ? अहं का ? त्वं का ? सः कः ? सा का ? अयं कः ? इयं का ? अहं भरतः/रविः/शान्तिः/रघुः। अहं श्रद्धा/केतकी/अभिजित्। अहं भरतः। अहं रविः नास्मि। अहं श्रद्धा। अहं शान्तिः नास्मि। त्वं भरतः नासि ? सः भरतः नास्ति ? अयं भरतः नास्ति ? त्वं श्रद्धा नासि ? सा श्रद्धा नास्ति ? इयं श्रद्धा नास्ति ?

Table 1 →

<table>
<tr><td>अहं</td><td rowspan="6">कः ?<br>का ?</td></tr>
<tr><td>त्वं</td></tr>
<tr><td>सः</td></tr>
<tr><td>सा</td></tr>
<tr><td>अयं</td></tr>
<tr><td>इयं</td></tr>
</table>

<table>
<tr><td rowspan="6">अहं<br>त्वं<br>सः<br>सा<br>अयं<br>इयं</td><td>भरत</td><td rowspan="3">+ :</td></tr>
<tr><td>रवि, शान्ति</td></tr>
<tr><td>रघु</td></tr>
<tr><td>श्रद्धा</td><td rowspan="3"></td></tr>
<tr><td>केतकी</td></tr>
<tr><td>अभिजित्</td></tr>
</table>

*वाक्यानि रचय। यथा –*

त्वं मां पृच्छसि। अहं त्वां पृच्छामि। त्वं तं भरतं पृच्छसि। त्वं तां श्रद्धां पृच्छसि। त्वम् इमं रविं पृच्छसि। त्वम् इमां शान्तिं पृच्छसि। अहं तं भरतं पृच्छामि। अहं तां श्रद्धां पृच्छामि। अहम् इमं रविं पृच्छामि। अहम् इमां शान्तिं पृच्छामि।

Table 2 →

<table>
<tr><td>त्वं</td><td colspan="2">मां</td><td>पृच्छसि, जानासि, पश्यसि, कथयसि।</td></tr>
<tr><td>अहं</td><td colspan="2">त्वां</td><td>पृच्छामि, जानामि, पश्यामि, कथयामि।</td></tr>
<tr><td rowspan="3">त्वं<br>अहं</td><td>(पुं) तम्, इमम्<br>(स्त्री) ताम्, इमाम्</td><td></td><td rowspan="3">पृच्छसि, जानासि, पश्यसि, कथयसि।<br>पृच्छामि, जानामि, पश्यामि, कथयामि।</td></tr>
<tr><td>भरत, रवि, रघु<br>श्रद्धा, शान्ति, केतकी</td><td>+म्</td></tr>
<tr><td>अभिजित्, सुकृत्</td><td>+अम्</td></tr>
</table>

**NOTE :**

The suffixes या, यै, याः, याम् are added to the words ending in आ. Hence remove य् and add the remainder when you have feminine words ending in इ, ई, उ, ऊ, e.g., भवती+आ (या–य्) = भवत्या। भवती+ऐ = भवत्यै। भवती+आः = भवत्याः। भवती+आम् = भवत्याम्।

Similarly ना, ने, नः, नि are added to neuter words ending in इ and उ , e.g., अस्थिना, अस्थिने, अस्थिनः, अस्थिनि, जानुना, जानुने, जानुनः, जानुनि। Hence remove न् and add the remainder to भवत्, e.g., भवत्+आ (ना–न्) = भवता। भवत्+ए = भवते। भवत्+अः = भवतः। भवत्+इ = भवति।

In fact, this remainder is added to the words where no suffix is specified, e.g., मनस्+आ = मनसा। मनस्+ए = मनसे। मनस्+अः = मनसः। मनस्+इ = मनसि। जन्मन्+आ = जन्मना। जन्मन्+ए = जन्मने। जन्मन्+अः = जन्मनः। जन्मन् +इ = जन्मनि।

*वाक्यानि रचय। यथा –*

त्वं मया सह गन्तुम् इच्छसि ? अहं त्वया सह गन्तुम् इच्छामि। अहं तेन बालकेन (बालक+इन) सह गन्तुम् इच्छामि। अहं तया बालिकया (बालिक+या) सह गन्तुम् इच्छामि। अहं भवत्या (भवती+आ) सह गन्तुम् इच्छामि। अहं भवता (भवत्+आ) सह गन्तुम् इच्छामि।

Table 3 →

<table>
<tr><td>त्वं</td><td colspan="3">मया</td><td>सह गन्तुम् इच्छसि ?</td></tr>
<tr><td rowspan="7">अहं</td><td colspan="3">त्वया</td><td rowspan="7">सह गन्तुम् इच्छामि।</td></tr>
<tr><td>तेन</td><td>बालक</td><td>+इन</td></tr>
<tr><td>तया</td><td>बालिका (बालिक)</td><td rowspan="4">+या</td></tr>
<tr><td>अनेन</td><td>बालक</td></tr>
<tr><td>अनया</td><td>बालिका (बालिक)</td></tr>
<tr><td rowspan="2"></td><td>भवती +आ</td></tr>
<tr><td>भवत् +आ</td><td>ना</td></tr>
</table>

Use खेलितुम्, भ्रमितुम्, आलपितुम् in place of गन्तुम्, e.g., त्वं मया सह खेलितुम् इच्छसि ? अहं त्वया सह खेलितुम् इच्छामि। त्वं मया सह भ्रमितुम् इच्छसि ? अहं त्वया सह भ्रमितुम् इच्छामि। त्वं मया सह आलपितुम् इच्छसि ? अहं त्वया सह आलपितुम् इच्छामि।

*वाक्यानि रचय। यथा –*

त्वं मह्यं मिष्टान्नं ददासि। अहं तुभ्यं मिष्टान्नं ददामि। अहं तस्मै बालकाय मिष्टान्नं ददामि। अहं तस्यै बालिकायै मिष्टान्नं ददामि। अहं भवत्यै (भवती+ऐ) मिष्टान्नं ददामि। अहं भवते (भवत्+ए) मिष्टान्नं ददामि।

Table 4 →

<table>
<tr><td>त्वं</td><td colspan="3">मह्यं</td><td>मिष्टान्नं ददासि।</td></tr>
<tr><td rowspan="7">अहं</td><td colspan="3">तुभ्यं</td><td rowspan="7">मिष्टान्नं ददामि।</td></tr>
<tr><td>तस्मै</td><td>बालक</td><td rowspan="5">+आय<br>+यै</td></tr>
<tr><td>तस्यै</td><td>बालिका</td></tr>
<tr><td>अस्मै</td><td>बालक</td></tr>
<tr><td>अस्यै</td><td>बालिका</td></tr>
<tr><td rowspan="2"></td><td>भवती +ऐ</td></tr>
<tr><td>भवत् +ए</td><td>ने</td></tr>
</table>

*वाक्यानि रचय। यथा –*

त्वं मत् परं वद। अहं त्वत् परं वदिष्यामि। अहं तस्मात् बालकात् परं वदिष्यामि। अहं तस्याः बालिकायाः परं वदिष्यामि। अहं भवत्याः (भवती+आः) परं वदिष्यामि। अहं भवतः (भवत्+अः) परं वदिष्यामि।

Table 5 →

<table>
<tr><td>त्वं</td><td colspan="3">मत्</td><td>परं वद। लज्जसे ?</td></tr>
<tr><td rowspan="7">अहं</td><td colspan="3">त्वत्</td><td rowspan="7">परं वदिष्यामि।<br>न लज्जे।</td></tr>
<tr><td>तस्मात्</td><td>बालक</td><td rowspan="5">+आत्<br>+याः</td></tr>
<tr><td>तस्याः</td><td>बालिका</td></tr>
<tr><td>अस्मात्</td><td>बालक</td></tr>
<tr><td>अस्याः</td><td>बालिका</td></tr>
<tr><td rowspan="2"></td><td>भवती +आः</td></tr>
<tr><td>भवत् +अः</td><td>नः</td></tr>
</table>

*वाक्यानि रचय।*

Table 6 →

<table>
<tr><td colspan="3">मम</td><td rowspan="8">नाम किम् ?<br>मङ्गलं भवतु।</td></tr>
<tr><td colspan="3">तव</td></tr>
<tr><td>तस्य</td><td>बालक</td><td rowspan="5">+स्य<br>+याः</td></tr>
<tr><td>तस्याः</td><td>बालिका</td></tr>
<tr><td>अस्य</td><td>बालक</td></tr>
<tr><td>अस्याः</td><td>बालिका</td></tr>
<tr><td rowspan="2"></td><td>भवती +आः</td></tr>
<tr><td>भवत् +अः</td><td>नः</td></tr>
</table>

*वाक्यानि रचय। यथा –*

मयि देशभक्तिः अस्ति। त्वयि देशभक्तिः अस्ति। तस्मिन् बालके (बालक+इ) देशभक्तिः अस्ति। तस्यां बालिकायां देशभक्तिः अस्ति। भवत्यां (भवती+आम्) देशभक्तिः अस्ति। भवति (भवत्+इ) देशभक्तिः अस्ति।

Table 7 →

<table>
<tr><td colspan="3">मयि</td><td rowspan="8">देशभक्तिः अस्ति।<br>सद्गुणाः सन्ति।</td></tr>
<tr><td colspan="3">त्वयि</td></tr>
<tr><td>तस्मिन्</td><td>बालक (अ+इ=ए)</td><td rowspan="5">+इ<br>+याम्</td></tr>
<tr><td>तस्यां</td><td>बालिका</td></tr>
<tr><td>अस्मिन्</td><td>बालक</td></tr>
<tr><td>अस्यां</td><td>बालिका</td></tr>
<tr><td rowspan="2"></td><td>भवती +आम्</td></tr>
<tr><td>भवत् +इ</td><td>नि</td></tr>
</table>

# नवमाभ्यासः

Answers on page 49.

## गीतम्

एकं द्वे त्रीणि चत्वारि पञ्च षट्
सप्त अष्ट नव दश (२)
एकादश द्वादश त्रयोदश
चतुर्दश पञ्चदश षोडश
सप्तदश अष्टादश
ऊनविंशतिः विंशतिः।
त्रिंशत् चत्वारिंशत् पञ्चाशत्
षष्टिसप्तती अशीतिः
नवतिः शतं सहस्रम्।

| | विंशतिः | त्रिंशत् | चत्वारिंशत् | पञ्चाशत् | षष्टिः | सप्ततिः | नवतिः |
|---|---|---|---|---|---|---|---|
| एक+ | २१ | ३१ | ४१ | ५१ | ६१ | ७१ | ९१ |
| द्वा+ | २२ | ३२ | ४२ | ५२ | ६२ | ७२ | ९२ |
| पञ्च+ | २५ | ३५ | ४५ | ५५ | ६५ | ७५ | ९५ |
| सप्त+ | २७ | ३७ | ४७ | ५७ | ६७ | ७७ | ९७ |
| अष्टा+ | २८ | ३८ | ४८ | ५८ | ६८ | ७८ | ९८ |
| ऊन+ | ऊनत्रिंशत् | ऊनचत्वारिंशत् | ऊनपञ्चाशत् | ऊनषष्टिः | ऊनसप्ततिः | ऊनाशीतिः | ऊनशतम् |

त्रयोविंशतिः (त्रयः+विंशतिः), त्रयस्त्रिंशत् (त्रयः+त्रिंशत्), त्रयश्चत्वारिंशत् (त्रयः+चत्वारिंशत्), त्रयःपञ्चाशत्, त्रयःषष्टिः, त्रयःसप्ततिः, त्रयोनवतिः (त्रयः+नवतिः)। चतुर्विंशतिः (चतुः+विंशतिः), चतुस्त्रिंशत् (चतुः+त्रिंशत्), चतुश्चत्वारिंशत् (चतुः+चत्वारिंशत्), चतुःपञ्चाशत्, चतुःषष्टिः, चतुःसप्ततिः, चतुर्नवतिः (चतुः+नवतिः)। षड्विंशतिः, षट्त्रिंशत्, षट्चत्वारिंशत्, षट्पञ्चाशत्, षट्षष्टिः, षट्सप्ततिः, षण्णवतिः। अशीतिः, एकाशीतिः (एक+अशीतिः), द्व्यशीतिः (द्वि+अशीतिः), त्र्यशीतिः (त्रि+अशीतिः), चतुरशीतिः (चतुर्+अशीतिः), पञ्चाशीतिः (पञ्च+अशीतिः), षडशीतिः (षड्+अशीतिः), सप्ताशीतिः (सप्त+अशीतिः), अष्टाशीतिः (अष्ट+अशीतिः), ऊननवतिः।

# दशमाभ्यासः

English translation and answers on page 50.

## विशेष्य-विशेषण-प्रयोगः

एकं स्तोत्रम्।[1] एकः मन्त्रः।[2] एका प्रार्थना।[3]

एकं पद्यम्।[4] एकः श्लोकः।[5] एका कविता।[6]

एकं दिनम्।[7] एकः दिवसः।[8] एका तिथिः।[9] एवम् एव –

श्वेत → हंसः, दुग्धम्, शर्करा।[10]
हरित → शुकः, पत्रम्, दूर्वा।[11]
रक्त → यानसङ्केतः, रुधिरम्, जवा।[12]
पीत → देहः, वसनम्, हरिद्रा।[13]
दीर्घ → मार्गः, कथा, भाषणम्।[14]
सुशील → बालकः, बालिका, मित्रम्।[15]
धवल → रसगोलः, पुण्डरीकम्, आमिक्षा।[16]
नील → आकाशः, उत्पलम्, धमनी।[17]
कृष्ण → केशः, छत्रम्, वेणी।[18]
पाटल → ओष्ठः, पुष्पम्, जिह्वा।[19]
विशाल → वृक्षः, नगरी, गृहम्।[20]
गभीर → कूपः, वापी, गर्तम्।[21]

| | | |
|---|---|---|
| एषः/अयम् | नूतनः/पुरातनः | पाठः, हारः, मार्गः, जनः, बन्धुः, शिक्षकः, विद्यालयः।[1] |
| एषा/इयम् | नूतना/पुरातनी | सञ्चिका, पत्रिका, कथा, वार्ता, शाटी, लेखनी, सखी।[2] |
| एतत्/इदम् | नूतनम्/पुरातनम् | यन्त्रम्, गीतम्, पुस्तकम्, कार्यम्, मित्रम्, उद्यानम्।[3] |
| एषः/अयम् | उत्तमः/श्रेष्ठः | जनः, शिक्षकः, विद्यालयः, बालकः, विचारः, सेवकः।[4] |
| एषा/इयम् | उत्तमा/श्रेष्ठा | शिक्षिका, बालिका, पाठशाला, सेविका, कविता।[5] |
| एतत्/इदम् | उत्तमम्/श्रेष्ठम् | स्थानम्, कार्यम्, सङ्गीतम्, काव्यम्, मित्रम्।[6] |

| | | | | | |
|---|---|---|---|---|---|
| (क) | अयं<br>एषः | विशाल | वृक्ष | अयं विशालः वृक्षः।<br>एषः " " | इमे विशालाः वृक्षाः।<br>एते " " |
| | | धार्मिक | जन | | |
| | | सुशील | छात्र | | |
| | | सुबोध | बालक | | |
| | | निर्जन | मार्ग | | |

| | | | | | |
|---|---|---|---|---|---|
| (ख) | इयं एषा | शोभन | बालिका | इयं शोभना बालिका।<br>एषा „ „ | इमाः शोभनाः बालिकाः।<br>एताः „ „ |
| | | दरिद्र | सेविका | | |
| | | रुचिर | कथा | | |
| | | महार्घ | शाटी | इयं महार्घा शाटी।<br>एषा „ „ | इमाः महार्घाः शाट्यः।<br>एताः „ „ |
| | | प्रिय | भगिनी | | |
| (ग) | इदं एतत् | पक्व | फल | इदं पक्वं फलम्।<br>एतत् „ „ | इमानि पक्वानि फलानि।<br>एतानि „ „ |
| | | श्वेत | पुष्प | | |
| | | मिष्ट | फल | | |
| | | दीर्ण | वस्त्र | | |
| | | उज्ज्वल | रत्न | | |

## गीतम्

एकः काकः एका काकी एकं पुष्पम् ।
द्वौ काकौ द्वे काक्यौ द्वे पुष्पे ॥
त्रयः काकाः तिस्रः काक्यः त्रीणि फलानि ।
चत्वारः ते चतस्रः ताः* चत्वारि तानि ॥

इदम् इमे इमानि वद त्वं नास्ति हानिः ।
गृहं गृहे गृहाणि मुखे मे मिष्टवाणी ॥
कमलं कमले कमलानि धनी गुणी च स्यां दानी ।
एतत् एते एतानि कदापि न स्यामभिमानी ॥

* चत्वारस्ते चतस्रस्ताः इति सन्धिं कृत्वा पठनीयम्।

# एकादशाभ्यासः

English translation and answers on page 50.

१. अद्य सः अनुभवति ? तेन किम् ?
२. तेऽपि अनुभवन्ति।
३. अहम् अपि अनुभवामि।
४. वयं सर्वेऽपि अनुभवामः।
५. त्वम् अनुभवितुम् इच्छसि ?
६. त्वम् अनुभविष्यसि ?
७. त्वम् अनुभव।
८. अनुभूय आनन्दं प्राप्स्यसि।

<table>
<tr><td>(क)</td><td>अनुभव, सन्तर, वितर, आलप, उत्थापय, उद्घाटय, प्रशंस, प्रसारय, सम्मार्जय, विदारय, उन्मूलय, उत्पादय, प्रकाशय, संवर, प्रोञ्छ, संशोधय, आस्वादय, अन्वेषय।</td><td rowspan="4">१. अद्य सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. त्वं . . . (तुम्) इच्छसि ?<br>६. त्वं . . . (स्य) ?<br>७. त्वं . . .<br>८. . . . (त्वा/य) आनन्दं प्राप्स्यसि।</td></tr>
<tr><td>(ख)</td><td>गच्छ, नम, वद, तर, पिब, गाय, तिष्ठ, जिघ्र, क्षिप, नुद, त्यज, मुञ्च, लिख, बोध, नृत्य, स्मर, धर, हर, पश्य, स्पृश, पृच्छ।</td></tr>
<tr><td>(ग)</td><td>विस्मर, अनुसर, अपसर, उद्धर, उपहर, आगच्छ, आनय, अभिनय, प्रणम, प्रविश, उपविश, विरम, आह्वय, उत्तिष्ठ, आरोह, अवरोह।</td></tr>
<tr><td>(घ)</td><td>कुरु, शृणु, चिनु, प्राप्नुहि, जानीहि, क्रीणीहि, गृहाण, मथान, बधान, देहि, स्वपिहि।</td></tr>
</table>

- १. ह्यः सः अन्वभवत् ? तेन किम् ? २. तेऽपि अन्वभवन्। ३. अहम् अपि अन्वभवम्। ४. वयं सर्वेऽपि अन्वभवाम। ५. ह्यः त्वम् अन्वभवः ?

<table>
<tr><td>(क)</td><td>अनुभव, सन्तर, वितर, आलप, उत्थापय, उद्घाटय, प्रशंस, प्रसारय, सम्मार्जय, विदारय, उन्मूलय, उत्पादय, प्रकाशय, संवर, प्रोञ्छ, संशोधय, आस्वादय, अन्वेषय।</td><td rowspan="4">१. ह्यः सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. ह्यः त्वम् . . . ?</td></tr>
<tr><td>(ख)</td><td>गच्छ, नम, वद, तर, पिब, गाय, तिष्ठ, जिघ्र, क्षिप, नुद, त्यज, मुञ्च, लिख, बोध, नृत्य, स्मर, धर, हर, पश्य, स्पृश, पृच्छ।</td></tr>
<tr><td>(ग)</td><td>विस्मर, अनुसर, अपसर, उद्धर, उपहर, आगच्छ, आनय, अभिनय, प्रणम, प्रविश, उपविश, विरम, आह्वय, उत्तिष्ठ, आरोह, अवरोह।</td></tr>
<tr><td>(घ)</td><td>कुरु, शृणु, चिनु, प्राप्नुहि, जानीहि, क्रीणीहि, गृहाण, मथान, बधान, देहि, स्वपिहि।</td></tr>
</table>

# द्वादशाभ्यासः

English translation and answers on page 52.

यूयं के ? वयं के ? यूयं काः ? वयं काः ? ते के ? ताः काः ? इमे के ? इमाः काः ? वयं धनिनः/बालकाः/बालिकाः/भगिन्यः/भ्रातरः/अतिथयः/युवतयः/शिशवः। यूयं धनिनः/बालकाः/बालिकाः/भगिन्यः/भ्रातरः/अतिथयः/युवतयः/शिशवः। ते/इमे/भवन्तः धनिनः/बालकाः/भ्रातरः/अतिथयः/शिशवः। ताः/इमाः/भवत्यः बालिकाः/भगिन्यः/युवतयः। For *sandhi* rules see page 56.

(भ्रातृ+अः=भ्रात्+ऋ+अः=भ्रात्+अर्+अः=भ्रातरः। अतिथि+अः =अतिथे+अः=अतिथ्+ए+अः=अतिथ्+अय्+अः=अतिथयः। शिशु+अः=शिशो+अः= शिश्+ओ+अः =शिश्+अव्+अः=शिशवः।)

Table 1 →

<table>
<tr><td>यूयं</td><td rowspan="8">के ?<br>काः ?</td></tr>
<tr><td>वयं</td></tr>
<tr><td>ते</td></tr>
<tr><td>ताः</td></tr>
<tr><td>इमे</td></tr>
<tr><td>इमाः</td></tr>
<tr><td>भवन्तः</td></tr>
<tr><td>भवत्यः</td></tr>
</table>

<table>
<tr><td rowspan="8">वयं<br>यूयं<br>ते<br>ताः<br>इमे<br>इमाः<br>भवन्तः<br>भवत्यः</td><td>धनिन्</td><td rowspan="8">+ अः</td></tr>
<tr><td>बालक</td></tr>
<tr><td>बालिका</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>अतिथि</td></tr>
<tr><td>युवति</td></tr>
<tr><td>शिशु</td></tr>
</table>

वयं युष्मान् पृच्छामः। यूयम् अस्मान् पृच्छथ। वयं तान्/इमान् बालकान्/अतिथीन्/शिशून्/धनिनः पृच्छामः। वयं भवतः पृच्छामः। वयं ताः/इमाः बालिकाः/युवतीः/भगिनीः पृच्छामः। वयं भवतीः पृच्छामः।

Table 2 →

<table>
<tr><td>वयं</td><td colspan="2">युष्मान्</td><td>पृच्छामः, जानीमः।</td></tr>
<tr><td>यूयं</td><td colspan="2">अस्मान्</td><td>पृच्छथ, जानीथ।</td></tr>
<tr><td rowspan="4">वयं</td><td>(पुं) तान्, इमान्<br>(स्त्री) ताः, इमाः</td><td></td><td rowspan="4">पृच्छामः, जानीमः।</td></tr>
<tr><td>बालक, अतिथि, शिशु, भ्रातृ</td><td>दीर्घं कृत्वा + न्</td></tr>
<tr><td>बालिका, युवति, भगिनी, भवती</td><td>दीर्घं कृत्वा + :</td></tr>
<tr><td>धनिन्, भवत्</td><td>+ अः</td></tr>
</table>

Table 3 →

<table>
<tr><td>यूयम्</td><td colspan="3">अस्माभिः</td><td>सह गन्तुम् इच्छथ ?</td></tr>
<tr><td rowspan="10">वयं</td><td colspan="3">युष्माभिः</td><td rowspan="10">सह गन्तुम् इच्छामः।</td></tr>
<tr><td rowspan="8">तैः (पुं)<br>ताभिः<br>एभिः (पुं)<br>आभिः</td><td>बालक</td><td>+ ऐः</td></tr>
<tr><td>बालिका</td><td rowspan="8">+ भिः</td></tr>
<tr><td>अतिथि</td></tr>
<tr><td>युवति</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>शिशु</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>धनिन् (धनि)</td></tr>
<tr><td></td><td>भवद्, भवती</td></tr>
</table>

Table 4 →

<table>
<tr><td>यूयम्</td><td colspan="3">अस्मभ्यं</td><td>मिष्टान्नं दत्थ।</td></tr>
<tr><td rowspan="10">वयं</td><td colspan="3">युष्मभ्यं</td><td rowspan="10">मिष्टान्नं दद्मः।</td></tr>
<tr><td rowspan="8">तेभ्यः (पुं)<br>ताभ्यः<br>एभ्यः (पुं)<br>आभ्यः</td><td>बालक*</td><td>+ एभ्यः</td></tr>
<tr><td>बालिका</td><td rowspan="8">+ भ्यः</td></tr>
<tr><td>अतिथि</td></tr>
<tr><td>युवति</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>शिशु</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>धनिन् (धनि)</td></tr>
<tr><td></td><td>भवद्, भवती</td></tr>
</table>

*बालक + एभ्यः = बालकेभ्यः। See foot-note on page 27.

Table 5 →

<table>
<tr><td>यूयम्</td><td colspan="3">अस्मत्</td><td>मिष्टान्नं गृह्णीथ/प्राप्नुथ।</td></tr>
<tr><td rowspan="10">वयं</td><td colspan="3">युष्मत्</td><td rowspan="10">मिष्टान्नं गृह्णीमः/प्राप्नुमः।</td></tr>
<tr><td rowspan="8">तेभ्यः (पुं)<br>ताभ्यः<br>एभ्यः (पुं)<br>आभ्यः</td><td>बालक</td><td>+ एभ्यः</td></tr>
<tr><td>बालिका</td><td rowspan="8">+ भ्यः</td></tr>
<tr><td>अतिथि</td></tr>
<tr><td>युवति</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>शिशु</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>धनिन् (धनि)</td></tr>
<tr><td></td><td>भवद्, भवती</td></tr>
</table>

Table 6 →

<table>
<tr><td colspan="3">युष्माकं</td><td rowspan="12">मङ्गलं भवतु।</td></tr>
<tr><td colspan="3">अस्माकं</td></tr>
<tr><td rowspan="8">तेषां (पुं)<br>तासां<br>एषां (पुं)<br>आसां</td><td>बालक</td><td rowspan="7">दीर्घं कृत्वा + नाम्</td></tr>
<tr><td>बालिका</td></tr>
<tr><td>अतिथि</td></tr>
<tr><td>युवति</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>शिशु</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>धनिन्</td><td rowspan="2">+ आम्</td></tr>
<tr><td rowspan="2"></td><td>भवत्</td></tr>
<tr><td>भवती</td><td>+ नाम्</td></tr>
</table>

Table 7 →

<table>
<tr><td colspan="3">युष्मासु</td><td rowspan="12">देशभक्तिः अस्ति।<br>सद्गुणाः सन्ति।</td></tr>
<tr><td colspan="3">अस्मासु</td></tr>
<tr><td rowspan="8">तेषु (पुं)<br>तासु<br>एषु (पुं)<br>आसु</td><td>बालक*</td><td>+ एषु</td></tr>
<tr><td>बालिका</td><td>+ सु</td></tr>
<tr><td>अतिथि</td><td rowspan="7">+ षु</td></tr>
<tr><td>युवति</td></tr>
<tr><td>भगिनी</td></tr>
<tr><td>शिशु</td></tr>
<tr><td>भ्रातृ</td></tr>
<tr><td>धनिन् (धनि)</td></tr>
<tr><td rowspan="2"></td><td>भवती</td></tr>
<tr><td>भवत्</td><td>+ सु</td></tr>
</table>

*बालक + एषु = बालकेषु। See foot-note on page 27.

## गीतम्

यूयं वयं ते ताः इमे इमाः
युष्मान् अस्मान् तान् ताः इमान् इमाः॥

*युष्माभिः अस्माभिः तैः ताभिः एभिः आभिः
युष्मभ्यम् अस्मभ्यं तेभ्यः ताभ्यः एभ्यः आभ्यः॥ यूयं वयं . . .

युष्मत् अस्मत् तेभ्यः ताभ्यः एभ्यः आभ्यः
युष्माकम् अस्माकं तेषां तासाम् एषाम् आसाम्॥ यूयं वयं . . .

युष्मासु अस्मासु तेषु तासु एषु आसु
ऐः भिः एभ्यः नाम् एषु आम् च सु॥ यूयं वयं . . .

* युष्माभिरस्माभिस्तैस्ताभिरेभिराभिः, तेभ्यस्ताभ्य एभ्य आभ्यः इति सन्धिं कृत्वा पठनीयम्।

Additional material on p. 63.

# त्रयोदशाभ्यासः

English translation and answers on page 54.

*वाक्यानि रचय। यथा –*

१. आर्य, आवां न जानीवः।
२. युवां न जानीथः ?
३. न हि आर्य !
४. किं यूयम् अपि न जानीथ ?
५. वयं सर्वेऽपि जानीमः। केवलं तौ न जानीतः।
६. एतत् न साधु। युवाम् अद्यैव जानीतम्। एषः मम आदेशः।

| | | |
|---|---|---|
| (क) | क्रीणीवः, गृह्णीवः, मथ्नीवः, बध्नीवः, शृणुवः, चिनुवः, प्राप्नुवः, दद्वः, स्वपिवः, कुर्वः। | १. आर्य, आवां न . . .<br>२. युवां न . . . ?<br>३. न हि आर्य ! |
| (ख) | पठ, खाद, खेल, हस, कथय, दर्शय, पूजय, गच्छ, नम, वद, पश्य, स्मर, अनुभव, वितर, सन्तर, विस्मर, अनुसर, अपसर, उत्तिष्ठ। | ४. किं यूयम् अपि न . . . ?<br>५. वयं सर्वेऽपि . . .। केवलं तौ न . . .<br>६. एतत् न साधु। युवाम् अद्यैव . . . |

- *वाक्यानि रचय। यथा –*

१. आर्य, ह्यः तौ न अजानीताम्।
२. आवाम् अपि न अजानीव।
३. किमर्थं युवां न अजानीतम् ?
४. किं यूयम् अपि न अजानीत ?
५. क्षम्यताम् आर्य, वयं सर्वेऽपि न अजानीम।
६. एतत् न साधु। यूयम् अधुनैव जानीत। एषः मम आदेशः / एषः मम अनुरोधः।

| | | |
|---|---|---|
| (क) | क्रीणीमः, गृह्णीमः, मथ्नीमः, बध्नीमः, शृणुमः, चिनुमः, प्राप्नुमः, दद्मः, स्वपिमः, कुर्मः। | १. आर्य, ह्यः तौ न . . .<br>२. आवाम् अपि न . . .<br>३. किमर्थं युवां न . . . ? |
| (ख) | पठ, खाद, खेल, हस, कथय, दर्शय, पूजय, गच्छ, नम, वद, पश्य, स्मर, अनुभव, वितर, सन्तर, विस्मर, अनुसर, अपसर, उत्तिष्ठ। | ४. किं यूयम् अपि न . . . ?<br>५. क्षम्यताम् आर्य, वयं सर्वेऽपि न . . .<br>६. एतत् न साधु। यूयम् अधुनैव . . . |

# चतुर्दशाभ्यासः

English translation and answers on page 54.

*वाक्यानि रचय। यथा –*

१. अद्य सः सेवते ? तेन किम् ?
२. तेऽपि सेवन्ते।
३. अहम् अपि सेवे।
४. वयं सर्वेऽपि सेवामहे।
५. त्वं सेवितुं कामयसे ?
६. त्वं सेविष्यसे ?
७. त्वं सेवस्व।
८. सेवित्वा आनन्दं लप्स्यसे।

| | | |
|---|---|---|
| (क) | सेवा, भाषा, चेष्टा, बाधा, भिक्षा, दया, राजा, शङ्का, स्पर्धा, जृम्भा, त्वरा, लज्जा, शोभा। | १. अद्य सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. त्वं . . . (तुम्) कामयसे ?<br>६. त्वं . . . (स्य) ?<br>७. त्वं . . .<br>८. . . . (त्वा/य) आनन्दं लप्स्यसे। |
| (ख) | क्षमा, रमा, विद्या, अनुकम्पा, परीक्षा, प्रतीक्षा, अपेक्षा। | |
| (ग) | वन्दते, वर्तते, यतते, कूर्दते, वर्धते, याचते, कासते, घूर्णते, कम्पते। | |
| (घ) | युध्यते, उड्डयते, विजयते, लभते, सहते, आरभते, पलायते, जायते, म्रियते, मन्यते। | |

● १. ह्यः सः असेवत ? तेन किम् ? २. तेऽपि असेवन्त। ३. अहम् अपि असेवे। ४. वयं सर्वेऽपि असेवामहि। ५. ह्यः त्वम् असेवथाः ?

| | | |
|---|---|---|
| (क) | सेवा, भाषा, चेष्टा, बाधा, भिक्षा, दया, राजा, शङ्का, स्पर्धा, जृम्भा, त्वरा, लज्जा, शोभा। | १. ह्यः सः . . . ? तेन किम् ?<br>२. तेऽपि . . .<br>३. अहम् अपि . . .<br>४. वयं सर्वेऽपि . . .<br>५. ह्यः त्वम् . . . ? |
| (ख) | क्षमा, रमा, विद्या, अनुकम्पा, परीक्षा, प्रतीक्षा, अपेक्षा। | |
| (ग) | वन्दते, वर्तते, यतते, कूर्दते, वर्धते, याचते, कासते, घूर्णते, कम्पते। | |
| (घ) | युध्यते, उड्डयते, विजयते, लभते, सहते, आरभते, पलायते, जायते, म्रियते, मन्यते। | |

*वाक्यानि रचय। यथा –*

१. आर्य, आवां न सेवावहे।
२. युवां न सेवेथे ?
३. न हि आर्य !
४. किं यूयम् अपि न सेवध्वे ?
५. वयं सर्वेऽपि सेवामहे। केवलं तौ न सेवेते।
६. एतत् न साधु। युवाम् अद्यैव सेवेथाम्। एषः मम आदेशः।

| | | |
|---|---|---|
| (क) | सेवा, भाषा, चेष्टा, शिक्षा, शङ्का, त्वरा, लज्जा, परीक्षा, प्रतीक्षा, अनुकम्पा। | १. आर्य, आवां न . . .<br>२. युवां न . . . ?<br>३. न हि आर्य !<br>४. किं यूयम् अपि न . . . ?<br>५. वयं सर्वेऽपि . . .। केवलं तौ न . . .<br>६. एतत् न साधु। युवाम् अद्यैव . . . |
| (ख) | वन्दते, वर्तते, यतते, वर्धते, युध्यते, लभते, सहते, पलायते। | |

१. आर्य, ह्यः तौ न असेवेताम्।
२. आवाम् अपि न असेवावहि।
३. किमर्थं युवां न असेवेथाम् ?
४. किं यूयम् अपि न असेवध्वम् ?
५. क्षम्यताम् आर्य, वयं सर्वेऽपि न असेवामहि।
६. एतत् न साधु। यूयम् अधुनैव सेवध्वम्। एषः मम आदेशः।

| | | |
|---|---|---|
| (क) | सेवा, भाषा, चेष्टा, शिक्षा, शङ्का, त्वरा, लज्जा, परीक्षा, प्रतीक्षा, अनुकम्पा। | १. आर्य, ह्यः तौ न . . .<br>२. आवाम् अपि न . . .<br>३. किमर्थं युवां न . . . ?<br>४. किं यूयम् अपि न . . . ?<br>५. क्षम्यताम् आर्य, वयं सर्वेऽपि न . . .<br>६. एतत् न साधु। यूयम् अधुनैव . . . |
| (ख) | वन्दते, वर्तते, यतते, वर्धते, युध्यते, लभते, सहते, पलायते। | |

### Page 61, No. 2

यत्र शान्तिः तत्र सुखम् Where there is peace, there is happiness. सर्वत्र everywhere. एकत्र in one place. यदा त्वं वदसि तदा अहं न वदामि। यदा अहं वदामि तदा त्वं न वद। When you speak, I don't. When I speak, you keep quiet. सदा, सर्वदा always. एकदा once upon a time. वा, किंवा, अथवा or. मा never. पुरा in olden days. दिवा day. विना without. यथा पिता तथा पुत्रः Like father, like son. मिथ्या lie. इदं सर्वथा असत्यम् This is altogether false. सहसा all of a sudden. अथ then, used for an auspicious beginning. हि, खलु indeed. इव like. यदि धनम् अस्ति तर्हि दानं कुरु If you have money then give it in charity. तु on the other hand. तु, किन्तु, परन्तु but. एव is used for emphasis. सत्यमेव जयते। इति is used for completing the quotation. संस्कृतं भारतस्य राष्ट्रभाषा भवेत् इति श्रीमाता कथयति "The Sanskrit ought to be the national language of India", says the Mother. इह here. प्रति to, towards. उपरि above. सम्प्रति now.

# धातुरूपसारणी

Examples on page 55.

| | | +इष्य+ अद्य, श्वः | आर्य | अ+ ह्यः | +ए+ विधिपूर्वकम् | | |
|---|---|---|---|---|---|---|---|
| 1 | [अहं] | आमि | आनि | अम् | यम् | | परस्मैपदी |
| | | ए | ऐ | ए | य | | आत्मनेपदी |
| 2 | [आवां] | आवः | आव | आव | एव | | परस्मैपदी |
| | | +हे | +है | +हि | +हि | | आत्मनेपदी |
| 3 | यूयं | थ | त | | | | परस्मैपदी |
| | | ध्वे | ध्वम् | | | | आत्मनेपदी |
| 4 | त्वं | सि | × | स् | | | परस्मैपदी |
| | | से | स्व | थास् | | | आत्मनेपदी |
| 5 | [ते] | न्ति | न्तु | न् | युः | ते | परस्मैपदी |
| | | न्ते | न्ताम् | न्त | रन् | | आत्मनेपदी |
| 6 | [सः] | ति | तु | त् | | सः | परस्मैपदी |
| | | ते | ताम् | त | | | आत्मनेपदी |
| 7 | [तौ] | तस् | ताम् | | | तौ | परस्मैपदी |
| | | एते | एताम् | | एयाताम् | | आत्मनेपदी |
| 8 | [युवां] | थस् | तम् | | | युवाम् | परस्मैपदी |
| | | एथे | एथाम् | | एयाथाम् | | आत्मनेपदी |

INSTRUCTIONS:

1. ‘स्’ changes to ‘:’ (विसर्ग), e.g., ह्यः त्वम् अपठः (अ+पठ+स्). ह्यः त्वम् अभाषथाः। Row No. 4.
2. In the column ‘विधिपूर्वकम्’ if the suffix has already an ‘ए’ do not add another, e.g., आवां विधिपूर्वकं पठेव* (पठ+एव). Row No. 2. तौ विधिपूर्वकं भाषेयाताम्।* Row No. 7. Foot-note on p. 27.

3. In Row No. 2 the 'व' in the suffixes change to म if the subject is वयम्, e.g., अद्य वयं पठामः। श्वः वयं पठिष्यामः। आर्य, वयं पठाम ? ह्यः वयम् अपठाम। वयं विधिपूर्वकं पठेम।

4. In Row No. 2 join both the suffixes to the आत्मनेपदी roots, e.g., अद्य आवां भाषावहे (भाष+आव+हे)। श्वः आवां भाषिष्यावहे (भाष+इष्य+आव+हे)* । आर्य, आवां भाषावहै (भाष+आव+है) ? ह्यः आवाम् अभाषावहि (अ+भाष+आव+हि)। आवां विधिपूर्वकं भाषेवहि (भाष+एव+हि)* । Replace व by म if the subject is वयम्, e.g., अद्य वयं भाषामहे। श्वः वयं भाषिष्यामहे। आर्य, वयं भाषामहै ? ह्यः वयम् अभाषामहि। वयं विधिपूर्वकं भाषेमहि।

5. In Row No. 4 there is no suffix in the column 'आर्य', e.g., त्वं पठ।

6. From Row No. 3 onwards use 'एषः मम आदेशः' instead of 'आर्य', e.g., यूयं पठत। एषः मम आदेशः। यूयं भाषध्वम्। एषः मम आदेशः। त्वं पठ। एषः मम आदेशः।

7. The preceding suffix follows the empty blocks, e.g., In Row No. 3 ह्यः यूयम् अपठत (अ+पठ+त). यूयं विधिपूर्वकं पठेत। ह्यः यूयम् अभाषध्वम्। यूयं विधिपूर्वकं भाषेध्वम्। In Row No. 4 त्वं विधिपूर्वकं पठेः। त्वं विधिपूर्वकं भाषेथाः। In Row No. 6 सः विधिपूर्वकं पठेत्। सः विधिपूर्वकं भाषेत। In Row No. 7 ह्यः तौ अपठताम्। तौ विधिपूर्वकं पठेताम्। ह्यः तौ अभाषेताम्। In Row No. 8 ह्यः युवाम् अपठतम्। युवां विधिपूर्वकं पठेतम्। ह्यः युवाम् अभाषेथाम्। (त्वं विधिपूर्वकं पठेः you should read properly. Actually विधिपूर्वकम् means 'as per rules prescribed in the Shastras'.)

8. Ignore the bracketed words and you have a song:

## गीतम्

अद्य श्वः आर्य ह्यः विधिपूर्वकम्॥

आमि आनि अम् यम्, ए ऐ ए य।
आवः आव आव एव, हे है हि हि॥

यूयं थ त, ध्वे ध्वम्।
त्वं सि स्, से स्व थास्॥ आमि आनि...

न्ति न्तु न् युः ते, न्ते न्ताम् न्त रन्।
ति तु त् सः, ते ताम् त॥ यूयं थ त...

तस् ताम् तौ, एते एताम् एयाताम्।
थस् तम् युवाम्, एथे एथाम् एयाथाम्॥ यूयं थ त...



9. Add the above suffixes to : वद, पठ, हस, खेल। (परस्मैपदी)
भाष, शिक्ष, स्मय (smile), कूर्द (jump). (आत्मनेपदी)

---

* अत्र सन्धिनियमः न पालितः। 'पररूपम् एकादेशः' इति महर्षिपाणिनेः विधानं स्मृत्वा 'समादधति सज्जनाः' इति न्यायेन अत्रापि समाधानं कर्तव्यं छात्राणां हितेच्छुभिः विद्वद्भिः।

# प्रथमाभ्यासः

1. Good morning, Sir ! 2. Good morning, Geeta ! Is everything ok ? 3.Yes Sir, everything is ok. Here is my friend who wants to speak Sanskrit. 4. Is it so ? 5. Yes, Sir ! 6. A good idea. What is her name ? 7. *(To her friend)* Tell, tell your name. 8. My name is Madhuri. 9. A sweet name, a nice name. I think, her father's name is Saroj. 10. Yes, Sir. How did you know ? 11. By facial resemblance. He was my classmate. *(To Madhuri)* Where is your residence ? 12. Near-by, half a kilometre away. 13. Madhuri, you do speak Sanskrit ! 14. Sir, she has studied two years in the school. But she is afraid. 15. Afraid ? Of what ? Of speaking ? 16. No, Sir. I am afraid of grammar. I can't mug up. 17. Mugging up is not necessary. 18. Sir, that is what I told her. She does not believe it. 19. Madhuri, you see our method. If you don't like it, don't come. 20. Sir, when should she come ? 21. She can come tomorrow. 22. Tomorrow when ? 23. At 7 in the morning. *(To Madhuri)* Can you come ? 24. Yes, Sir. I will come. 25. Good. Don't be afraid. I won't hit you. 26. Thank you, Sir. 27. See you again.

The underlined words in the dialogue will change if गीता, शिक्षकः, माधुरी and सरोजः are replaced by रविः, शिक्षिका, रघुः and देवकी *or* by सत्यजित्, शिक्षिका, सत्यवान् and सुमतिः. Rewrite the dialogue by selecting the correct words from below:

| *पुंलिङ्गे masc.* | *स्त्रीलिङ्गे fem.* | *पुंलिङ्गे masc.* | *स्त्रीलिङ्गे fem.* |
|---|---|---|---|
| [हे] आर्य | [हे] आर्ये | अस्य | अस्याः |
| [हे] सरोज, सत्यजित् | [हे] गीते | तस्य | तस्याः |
| [हे] रवे | [हे] सुमते | पितुः | मातुः |
| [हे] रघो, सत्यवन् | [हे] देवकि | पठितवान्, भवान् | पठितवती, भवती |
| एषः | एषा | अनुगृहीतोऽस्मि | अनुगृहीतास्मि |
| सहपाठी | सहपाठिनी | सखायम् | सखीम् |
| सखा | सखी | सत्यवन्तम्, सत्यजितम् | सुमतिम् |

The following sloka contains the vocative form of different words:

हे गुणिन् भगवन् देव पितः साधो हरे वधु। पाहि मां चण्डिके देवि पाहि मां जगदम्बिके॥

(पुं, स्त्री.) [अ, इ, उ → :]

Add विसर्ग to the names ending in अ, इ and उ if they are used as subjects, e.g., एषः सरोजः। मम पितुः नाम सरोजः। एषः रविः। मम भ्रातुः नाम रविः। एषा सुमतिः। मम भगिन्याः नाम सुमतिः। एषः रघुः। मम मातुलस्य नाम रघुः। एषा देवकी। मम मातुलान्याः नाम देवकी।

. . . कुत्र ?

हे . . . , अत्र आगच्छ। . . . त्वाम् आह्वयति।

(उदाहरणम् – सुरेशः कुत्र ?[1] हे सुरेश, अत्र आगच्छ। मीरा त्वाम् आह्वयति।[2] मीरा कुत्र ? हे मीरे, अत्र आगच्छ। शान्तिः त्वाम् आह्वयति। शान्तिः कुत्र ? हे शान्ते, अत्र आगच्छ। रविः त्वाम् आह्वयति। रविः कुत्र ? हे रवे, अत्र आगच्छ। रघुः त्वाम् आह्वयति। रघुः कुत्र ? हे रघो, अत्र आगच्छ। देवकी त्वाम् आह्वयति। देवकी कुत्र ? हे देवकि, अत्र आगच्छ। सत्यजित् त्वाम् आह्वयति। सत्यजित् कुत्र ? हे सत्यजित्, अत्र आगच्छ। माता त्वाम् आह्वयति। माता कुत्र ? हे मातः, अत्र आगच्छ। भ्राता त्वाम् आह्वयति। भ्राता कुत्र ? हे भ्रातः, अत्र आगच्छ। पिता त्वाम् आह्वयति।)

1. Where is Suresh ? 2. O Suresh, come here. Meera is calling you.

सुप्रभातम् good morning. सुसायम् good evening. सुरात्रिः good night.

## द्वितीयाभ्यासः

१. *Use the word कलाकारः in the gaps, e.g..*

(क) त्वं कलाकारः ?[1] त्वं सत्यं कलाकारः ?[2] आम्, अहं कलाकारः।[3] तर्हि त्वं कलाकारः असि।[4] आम्, आम्। अहं कलाकारः अस्मि।[5] कतिवारं कथनीयम् ? or कतिवारं कथयेयम् ?[6] अहं कलाकारः अस्मि।[7]

1. Are you an artist ? [The verb असि (are) is understood in the original sentence.] 2. Are you really an artist ? 3. Yes, I am an artist. 4. Then you are an artist. 5. Yes, yes. I am an artist. 6. How many times should I say ? 7. I am an artist.

**Exercises :**

1. Use चित्रकारः, नाट्यकारः, स्वर्णकारः and पत्रकारः in place of कलाकारः।
2. Repeat the exercise using the nouns in the feminine gender, e.g., त्वं कलाकारी ? त्वं सत्यं कलाकारी ? आम्, अहं कलाकारी। तर्हि त्वं कलाकारी असि। आम्, आम्। अहं कलाकारी अस्मि। कतिवारं कथनीयम् ? or कतिवारं कथयेयम् ? अहं कलाकारी अस्मि।
3. Repeat the exercise using चित्रकारी, नाट्यकारी, स्वर्णकारी and पत्रकारी in place of कलाकारी।

(ख) त्वं कलाकारः ?[1] त्वं सत्यं कलाकारः ?[2] न, अहं न कलाकारः।[3] त्वं कलाकारः नासि ?[4] कथयामि, अहं कलाकारः नास्मि।[5] बधिरोऽसि ? श्रोतुं न शक्नोषि ?[6] अहं कलाकारः नास्मि।[7]

1. Are you an artist ? 2. Are you really an artist ? 3. No, I am not an artist. (अस्मि is understood in the original sentence.) 4. You are not an artist ? 5. I am telling you, I am not an artist. 6. Are you deaf ? Can't you hear ? 7. I am not an artist.

(ग) अत्र कोऽपि कलाकारः अस्ति ?[1] भवान् कलाकारः अस्ति।[2] सः बालकः कलाकारः अस्ति।[3] अयं बालकः कलाकारः अस्ति ?[4] आश्चर्यम् ! अत्र कोऽपि कलाकारः नास्ति ![5]

1. Is anybody an artist here ? 2. Are you an artist ? (भवान् is used for an elderly and respectable person). 3. Is that boy an artist ? 4. Is this boy an artist ? 5. Strange ! There is no artist here !

*Repeat the exercise using the nouns in the feminine gender, e.g.,*

अत्र कापि कलाकारी अस्ति ? भवती कलाकारी अस्ति ? सा बालिका कलाकारी अस्ति ? इयं बालिका कलाकारी अस्ति ? आश्चर्यम् ! अत्र कापि कलाकारी नास्ति ?

(घ) सः कलाकारः अस्ति ?[1] सः सत्यं कलाकारः अस्ति ?[2] आम्, सः कलाकारः अस्ति।[3] एषः अपि कलाकारः अस्ति।[4] मम पिता अपि कलाकारः अस्ति।[5] तस्य पिता अपि कलाकारः अस्ति।[6] अस्य पिता अपि कलाकारः अस्ति।[7]

1. Is he an artist ? 2. Is he really an artist ? 3. Yes, he is an artist. 4. This [gentleman] is also an artist. 5. My father is also an artist. 6. His father is also an artist. 7. This [gentleman's] father is also an artist.

*Repeat the exercise using the nouns in the feminine gender, e.g.,*

सा कलाकारी अस्ति ? सा सत्यं कलाकारी अस्ति ? आम्, सा कलाकारी अस्ति। एषा अपि कलाकारी अस्ति। मम माता अपि कलाकारी अस्ति। तस्याः माता अपि कलाकारी अस्ति। अस्याः माता अपि कलाकारी अस्ति।

## Games :

1. Divide the students into Groups A and B. Count each group serially and assign a number to each student. The student 1 from Gr. A speaks out a word or a sentence from this lesson and his counterpart in Gr. B has to translate it into English. If he translates correctly, he gets 1 point, otherwise zero. The game continues till the last number is covered. The winner group will be the one who scores more points.

2. A member of Gr. A shows a picture of one of the professions listed below and a member of Gr. B has to say the correct Sanskrit word. Points are given and winner decided as in the game above.

3. A member of Gr. A speaks out a word or a sentence in Sanskrit from the first lesson and a member of Gr. B gives another word or a sentence in Sanskrit from the same lesson. The group which is unable to continue is defeated.

4. Place pictures of different professions mentioned below on your table in a jumble. Call one member from each group. Name a profession. He who picks up the right picture gets one point. The winner group will be the one who scores more points.

*एषु कति शब्दाः तव परिचिताः ?* How many of the following words do you already know ?

(क) [1]कलाकारः, [2]चित्रकारः, [3]नाट्यकारः, [4]स्वर्णकारः, [5]पत्रकारः, [6]लोहकारः, [7]यन्त्रकारः, [8]मणिकारः, [9]शिल्पकारः, [10]कोषकारः, [11]संविदाकारः, [12]कुम्भकारः, [13]मूर्तिकारः, [14]चर्मकारः, [15]शल्यकारः, [16]विद्युत्कारः, [17]भाष्यकारः।

1. artist. 2. painter. 3. playwright. 4. goldsmith. 5. journalist. 6. blacksmith. 7. mechanic. 8. jeweller. 9. artisan. 10. lexicographer. 11. contractor. 12. potter. 13. sculptor. 14. shoe-maker. 15. surgeon. 16. electrician. 17. commentator.

(ट) मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः।
कविना च विभुर्विभुना च कविः कविना विभुना च विभाति सभा॥

(ठ) ॐ यादवाय माधवाय केशवाय नमः।

(ड) ॐ नमश्चक्षुस्तेजोदात्रे दिव्याय भास्कराय। ॐ नमः करुणाकरायामृताय। ॐ नमः सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे नमः। खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः।

(ढ) ॐ मित्राय नमः। ॐ रवये नमः। ॐ सूर्याय नमः। ॐ भानवे नमः। ॐ खगाय नमः। ॐ पूष्णे नमः। ॐ हिरण्यगर्भाय नमः। ॐ मरीचिमालिने नमः। ॐ आदित्याय नमः। ॐ सवित्रे नमः। ॐ अर्काय नमः। ॐ भास्कराय नमः।

(ण) विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय॥

(त) या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

(थ) क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः। स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥

(द) हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्। बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम्।

(ध) आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्। यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।
पूर्णा भवत्वनुदिनं मयि ते शुभेच्छा।

(न) देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ। यादृशी भावना यस्य सिद्धिर्भवति तादृशी॥

(प) मयि त्वयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम्॥

(फ) हते भीष्मे हते द्रोणे कर्णे च विनिपातिते। आशा बलवती राजन् शल्यो जेष्यति पाण्डवान्॥

(ब) धर्मे तत्परता मुखे मधुरता दाने समुत्साहिता मित्रेऽवञ्चकता गुरौ विनयिता चित्तेऽतिगम्भीरता।
आचारे शुचिता गुणे रसिकता शास्त्रे सुविज्ञानिता सत्त्वे सुन्दरता हरौ भजनिता सत्स्वेव सन्दृश्यते॥

(भ) विवादे विषादे प्रमादे प्रवासे जले चानले पर्वते शत्रुमध्ये।
अरण्ये शरण्ये सदा मां प्रपाहि गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥

## नवमाभ्यासः

षष्टिः च सप्ततिः च = षष्टिसप्तती।

एकविंशतिः, एकत्रिंशत्, एकचत्वारिंशत्, एकपञ्चाशत्, एकषष्टिः, एकसप्ततिः, एकनवतिः। द्वाविंशतिः, द्वात्रिंशत्, द्वाचत्वारिंशत्, द्वापञ्चाशत्, द्वाषष्टिः, द्वासप्ततिः, द्वानवतिः। पञ्चविंशतिः, पञ्चत्रिंशत्, पञ्चचत्वारिंशत्, पञ्चपञ्चाशत्, पञ्चषष्टिः, पञ्चसप्ततिः, पञ्चनवतिः। सप्तविंशतिः, सप्तत्रिंशत्, सप्तचत्वारिंशत्, सप्तपञ्चाशत्, सप्तषष्टिः, सप्तसप्ततिः, सप्तनवतिः। अष्टाविंशतिः, अष्टात्रिंशत्, अष्टाचत्वारिंशत्, अष्टापञ्चाशत्, अष्टाषष्टिः, अष्टासप्ततिः, अष्टानवतिः।

# दशमाभ्यासः

1. a hymn of praise. 2. a hymn. 3. a prayer. 4. a poem. 5. a *sloka*. 6. a poem. 7. one day. 8. one day. 9. one day. 10. white → swan, milk, sugar. 11. green → parrot, leaf, grass. 12. red → traffic signal, blood, china rose. 13. yellow → body, cloth, turmeric. 14. long → way, story, lecture. 15. good-natured → boy, girl, friend. 16. white → *rasagulla*, lotus, cheese. 17. blue → sky, lotus, vein. 18. black → hair, umbrella, braided hair. 19. pink → lip, flower, tongue. 20. big → tree, town, house. 21. deep → well, well (with steps leading to the water-level), hole.

एषः नूतनः पाठः or अयं नूतनः पाठः। This is a new lesson.
एषा नूतना सञ्चिका or इयं नूतना सञ्चिका। This is a new note-book.
एतत् पुरातनं यन्त्रम् or इदं पुरातनं यन्त्रम्। This is an old machine.
एषः उत्तमः जनः। This is an excellent person. एषः श्रेष्ठः जनः। This is the best person.

1. lesson, necklace, road, person, friend, teacher, school. 2. note-book, magazine, story, news, *sari*, pen, friend. 3. machine, song, book, work, friend, garden. 4. person, teacher, school, boy, idea, servant. 5. madam, girl, school, maid-servant, poem. 6. place, work, music, poem, friend.

अयं विशालः वृक्षः This is a big tree. इमे विशालाः वृक्षाः These are big trees. धार्मिकः जनः a religious man. सुशीलः छात्रः a good-natured student. सुबोधः बालकः an understanding boy. निर्जनः मार्गः a lonely road. शोभना बालिका a good girl. दरिद्रा सेविका a poor maid-servant. रुचिरा कथा an interesting story. महार्घा शाटी a costly *sari*. प्रिया भगिनी a dear sister. पक्वं फलम् a ripe fruit. श्वेतं पुष्पम् a white flower. मिष्टं फलम् a sweet fruit. दीर्णं वस्त्रम् a torn cloth. उज्ज्वलं रत्नम् a bright jewel.

श्वेतः हंसः। श्वेतं दुग्धम्। श्वेता शर्करा। हरितः शुकः। हरितं पत्रम्। हरिता दूर्वा।

(ग) इमानि दीर्णानि वस्त्राणि। एतानि दीर्णानि वस्त्राणि। इमानि/एतानि उज्ज्वलानि रत्नानि।

(क) ८. अनुभूय, सन्तीर्य, वितीर्य, आलप्य, उत्थाप्य, उद्घाट्य, प्रशंस्य, प्रसार्य, सम्मार्ज्य, विदार्य, उन्मूल्य, उत्पाद्य, प्रकाश्य, संवृत्य, प्रोञ्छ्य, संशोध्य, आस्वाद्य, अन्वेष्य।

(ख) ५. गन्तुम्, नन्तुम्, वदितुम्, तरितुम्, पातुम्, गातुम्, स्थातुम्, घ्रातुम्, क्षेप्तुम्, नोत्तुम्, त्यक्तुम्, मोक्तुम्, लेखितुम्, बोधितुम्, नर्तितुम्, स्मर्तुम्, धर्तुम्, हर्तुम्, द्रष्टुम्, स्प्रष्टुम्, प्रष्टुम्।

६. गमिष्यसि, नंस्यसि, वदिष्यसि, तरिष्यसि, पास्यसि, गास्यसि, स्थास्यसि, घ्रास्यसि, क्षेप्स्यसि, नोत्स्यसि, त्यक्ष्यसि, मोक्ष्यसि, लेखिष्यसि, बोधिष्यसि, नर्तिष्यसि, स्मरिष्यसि, धरिष्यसि, हरिष्यसि, द्रक्ष्यसि, स्प्रक्ष्यसि, प्रक्ष्यसि।

८. गत्वा, नत्वा, उदित्वा, तीर्त्वा, पीत्वा, गीत्वा, स्थित्वा, घ्रात्वा, क्षिप्त्वा, नुत्त्वा, त्यक्त्वा, मुक्त्वा, लिखित्वा, बुधित्वा, नर्तित्वा, स्मृत्वा, धृत्वा, हृत्वा, दृष्ट्वा, स्पृष्ट्वा, पृष्ट्वा।

(ग) ५. विस्मर्तुम्, अनुसर्तुम्, अपसर्तुम्, उद्धर्तुम्, उपहर्तुम्, आगन्तुम्, आनेतुम्, अभिनेतुम्, प्रणन्तुम्, प्रवेष्टुम्, उपवेष्टुम्, विरन्तुम्, आह्वातुम्, उत्थातुम्, आरोढुम्, अवरोढुम्।

६. विस्मरिष्यसि, अनुसरिष्यसि, अपसरिष्यसि, उद्धरिष्यसि, उपहरिष्यसि, आगमिष्यसि, आनेष्यसि, अभिनेष्यसि, प्रणंस्यसि, प्रवेक्ष्यसि, उपवेक्ष्यसि, विरंस्यसि, आह्वास्यसि, उत्थास्यसि, आरोक्ष्यसि, अवरोक्ष्यसि।

८. विस्मृत्य, अनुसृत्य, अपसृत्य, उद्धृत्य, उपहृत्य, आगत्य, आनीय, अभिनीय, प्रणम्य, प्रविश्य, उपविश्य, विरम्य, आहूय, उत्थाय, आरुह्य, अवरुह्य।

(घ) १. करोति, शृणोति, चिनोति, प्राप्नोति, जानाति, क्रीणाति, गृह्णाति, मथ्नाति, बध्नाति, ददाति, स्वपिति।

२. कुर्वन्ति, शृण्वन्ति, चिन्वन्ति, प्राप्नुवन्ति, जानन्ति, क्रीणन्ति, गृह्णन्ति, मथ्नन्ति, बध्नन्ति, ददति, स्वपन्ति।

४. कुर्मः, शृणुमः, चिनुमः, प्राप्नुमः, जानीमः, क्रीणीमः, गृह्णीमः, मथ्नीमः, बध्नीमः, दद्मः, स्वपिमः।

५. कर्तुम्, श्रोतुम्, चेतुम्, प्राप्तुम्, ज्ञातुम्, क्रेतुम्, ग्रहीतुम्, मन्थितुम्, बन्धुम्, दातुम्, स्वप्तुम्।

६. करिष्यसि, श्रोष्यसि, चेष्यसि, प्राप्स्यसि, ज्ञास्यसि, क्रेष्यसि, ग्रहीष्यसि, मन्थिष्यसि, भन्त्स्यसि, दास्यसि, स्वप्स्यसि।

८. कृत्वा, श्रुत्वा, चित्वा, प्राप्य, ज्ञात्वा, क्रीत्वा, गृहीत्वा, मन्थित्वा, बद्ध्वा, दत्त्वा, सुप्त्वा।

● (क) ह्यः सः समतरत्/व्यतरत्/आलपत्/उदथापयत्/उदघाटयत्/प्राशंसत्/प्रासारयत्/सममार्जयत्/व्यदारयत्/उदमूलयत्/उदपादयत्/प्राकाशयत्/समवरत्/प्रौञ्छत्/समशोधयत्/आस्वादयत्/अन्वैषयत् ?

(ख) ह्यः सः अगच्छत्/अनमत्...

(ग) ह्यः सः व्यस्मरत्/अन्वसरत्/अपासरत्/उदधरत्/उपाहरत्/आगच्छत्/आनयत्/अभ्यनयत्/प्राणमत्/प्राविशत्/उपाविशत्/व्यरमत्/आह्वयत्/उदतिष्ठत्/आरोहत्/अवारोहत् ?

(घ) १. ह्यः सः अकरोत्/अशृणोत्/अचिनोत्/प्राप्नोत्/अजानात्/अक्रीणात्/अगृह्णात्/अमथ्नात्/अबध्नात्/अददात्/अस्वपत् ?

२. ह्यः ते अकुर्वन्/अशृण्वन्/अचिन्वन्/प्राप्नुवन्/अजानन्/अक्रीणन्/अगृह्णन्/अमथ्नन्/अबध्नन्/अददुः/अस्वपन्।

३. अहम् अपि अकरवम्/अशृणवम्/अचिनवम्/प्राप्नवम्/अजानाम्/अक्रीणाम्/अगृह्णाम्/अमथ्नाम्/अबध्नाम्/अददाम्/अस्वपम्।

४. वयं सर्वेऽपि अकुर्म/अशृणुम/अचिनुम/प्राप्नुम/अजानीम/अक्रीणीम/अगृह्णीम/अमथ्नीम/अबध्नीम/अदद्म/अस्वपिम।

५. ह्यः त्वम् अकरोः/अशृणोः/अचिनोः/प्राप्नोः/अजानाः/अक्रीणाः/अगृह्णाः/अमथ्नाः/अबध्नाः/अददाः/अस्वपः ?

# द्वादशाभ्यासः

यूयं के ? Who are you ? वयं के ? Who are we ? यूयं काः ? Who are you ? (in feminine gender). वयं काः ? Who are we ? (in feminine gender). ते के ? Who are they ? ताः काः ? Who are they ? (in feminine gender). इमे बालकाः के ? Who are these boys ? इमाः बालिकाः काः ? Who are these girls ? वयं धनिनः/बालकाः/बालिकाः/भगिन्यः/भ्रातरः/अतिथयः/युवतयः/शिशवः। We are rich men/boys/girls/sisters/brothers/guests/young ladies/children.यूयं धनिनः/बालकाः/बालिकाः/भगिन्यः/भ्रातरः/अतिथयः/युवतयः/शिशवः। ते/इमे/भवन्तः धनिनः/बालकाः/भ्रातरः/अतिथयः/शिशवः। ताः/इमाः/भवत्यः बालिकाः/भगिन्यः/युवतयः।

वयं तान् बालकान् पृच्छामः। वयं ताः बालिकाः पृच्छामः। वयम् इमान् बालकान् पृच्छामः। वयम् इमाः बालिकाः पृच्छामः। अतिथीन् (अतिथी+न्), शिशून् (शिशू+न्), भ्रातॄन् (भ्रातॄ+न्)। युवतीः (युवती+:), भगिनीः, भवतीः। धनिनः, भवतः।

वयं तैः बालकैः सह गन्तुम् इच्छामः। वयं ताभिः बालिकाभिः सह गन्तुम् इच्छामः। वयम् एभिः बालकैः सह गन्तुम् इच्छामः। वयम् आभिः बालिकाभिः सह गन्तुम् इच्छामः।

वयं तेभ्यः/एभ्यः बालकेभ्यः मिष्टान्नं दद्मः। वयं ताभ्यः/आभ्यः बालिकाभ्यः मिष्टान्नं दद्मः।

तेषां/एषां बालकानां/अतिथीनां/शिशूनां/भ्रातॄणां/धनिनां मङ्गलं भवतु। तासां/आसां बालिकानां/युवतीनां/भगिनीनां मङ्गलं भवतु। भवतां मङ्गलं भवतु। भवतीनां मङ्गलं भवतु।

तेषु/एषु बालकेषु/अतिथिषु/शिशुषु/भ्रातृषु/धनिषु देशभक्तिः अस्ति। तासु/आसु बालिकासु/युवतिषु/भगिनीषु देशभक्तिः अस्ति। भवतीषु देशभक्तिः अस्ति। भवत्सु देशभक्तिः अस्ति।

## गीतम्

यूयं स्थ। वयं स्मः। ते/ताः/इमे/इमाः सन्ति।
अस्मान्/तान्/ताः/इमान्/इमाः पृच्छ/वद। अहं युष्मान् पृच्छामि।
युष्माभिः/अस्माभिः/तैः/ताभिः/एभिः/आभिः किं कृतम् ?
अस्मभ्यं/तेभ्यः/ताभ्यः/एभ्यः/आभ्यः देहि/नमः। अहं युष्मभ्यं ददामि। युष्मभ्यं नमः।
अस्मत्/तेभ्यः/ताभ्यः/एभ्यः/आभ्यः परं वद। अहं युष्मत् पूर्वं वदामि।
अस्माकं/तेषां/तासाम्/एषाम्/आसां नाम वद। अहं युष्माकं नाम वदामि।
युष्मासु/अस्मासु/तेषु/तासु/एषु/आसु अग्निः ज्वलति।

(क) मेघाः गर्जन्ति। विद्युतः स्फुरन्ति। तारकाः प्रकाशन्ते। उल्काः पतन्ति। नद्यः वहन्ति। तरङ्गाः नृत्यन्ति। मत्स्याः तरन्ति। शिशवः वर्धन्ते। वृक्षाः फलन्ति।

(ख) मशकाः गुञ्जन्ति दशन्ति च। मत्कुणाः रक्तं पिबन्ति अन्तर्हिताः भवन्ति च। मक्षिकाः मले उपविशन्ति मलात् उत्प्लुत्य अन्ने उपविशन्ति च। पिपीलिकाः गुडं भक्षयन्ति, धान्यकणान् नयन्ति अण्डानि वहन्ति

च। मधुमक्षिकाः मधुसञ्चयं कुर्वन्ति मधुकोषं रचयन्ति च। भ्रमराः पुष्पात् पुष्पं भ्रमन्ति मधुपानं कुर्वन्ति च। पल्लिकाः भित्तौ भ्रमन्ति कीटान् भक्षयन्ति च।

(ग) उच्चतानुक्रमेण पङ्क्तिं कुरुत। एकं द्वे, एकं द्वे इति वदत। एकसङ्ख्यकाः द्विपदं पुरः चलत। माम् अभिवलत। पङ्क्तिं सरलां कुरुत। अर्धं वलत। हस्तौ स्कन्धयोः स्थापयत। स्तब्धं तिष्ठत। मण्डलं कुरुत। हस्तशृङ्खलां कुरुत। यदा अहं पूर्णं वाक्यं वदामि हस्तशृङ्खलां खण्डयित्वा तालिकां वादयत।

विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे
गङ्गातीर्थे मलिनमनसो योगिनो ध्यानतीर्थे।
धारातीर्थे धरणिपतयो दानतीर्थे धनाढ्या
लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ति॥

पञ्चैव पूजयंल्लोके यशः प्राप्नोति केवलम्।
देवान् पितॄन् मनुष्यांश्च भिक्षूनतिथिपञ्चमान्॥

नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम्।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना॥

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा॥



क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः।
ध्यातं वित्तमहर्निशं न च पुनर्विष्णोः पदं शाश्वतं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चितम्॥

धनिभ्यो धनिनः सन्ति वादिभ्यः सन्ति वादिनः।
बलिभ्यो बलिनः सन्ति तस्माद् दर्पं त्यजेद् बुधः॥

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः॥

परनिन्दासु पाण्डित्यं स्वेषु कार्येष्वनुद्यमः।
विद्वेषश्च गुणज्ञेषु पन्थानो ह्यापदां त्रयः॥
सम्पत्सु महतां चित्तं भवेदुत्पलकोमलम्।
आपत्सु च महाशैलशिलासङ्घातकर्कशम्॥

# चतुर्दशाभ्यासः

अद्य सः सेवते ? तेन किम् ? He serves today ? So what ? तेऽपि सेवन्ते। They too serve. अहम् अपि सेवे। I too serve. वयं सर्वेऽपि सेवामहे। We all serve. त्वं सेवितुं कामयसे ? Do you want to serve ? त्वं सेविष्यसे ? Will you serve ? त्वं सेवस्व। You serve. सेवित्वा आनन्दं लप्स्यसे। You will get joy by serving.

ह्यः सः असेवत ? तेन किम् ? He served yesterday ? So what ? तेऽपि असेवन्त। They too served. अहम् अपि असेवे। I too served. वयं सर्वेऽपि असेवामहि। We all served. ह्यः त्वम् असेवथाः ? Did you serve yesterday ?

(क) भाषते speaks. चेष्टते endeavours. बाधते disturbs. भिक्षते begs. दयते pities. राजते shines. शङ्कते doubts. स्पर्धते competes. जृम्भते yawns. त्वरते hurries up. लज्जते blushes. शोभते shines.

(ख) क्षमते forgives. रमते sports. विद्यते is. अनुकम्पते pities. परीक्षते examines. प्रतीक्षते waits. अपेक्षते expects. (ग) वन्दते salutes. वर्तते is. यतते tries. कूर्दते jumps. वर्धते grows. याचते begs. कासते coughs. घूर्णते turns. कम्पते trembles. (घ) युध्यते fights. उड्डयते flies. विजयते wins. लभते gets. सहते tolerates. आरभते begins. पलायते runs away. जायते is born. म्रियते dies. मन्यते thinks.

(ख) ५. क्षन्तुम्, रन्तुम्, वेत्तुम्, अनुकम्पितुम्, परीक्षितुम्, प्रतीक्षितुम्, अपेक्षितुम्।
६. क्षंस्यसे, रंस्यसे, वेत्स्यसे, अनुकम्पिष्यसे, परीक्षिष्यसे, प्रतीक्षिष्यसे, अपेक्षिष्यसे।
८. क्षमित्वा, रमित्वा, वित्त्वा, अनुकम्प्य, परीक्ष्य, प्रतीक्ष्य, अपेक्ष्य।

(घ) ५. योद्धुम्, उड्डयितुम्, विजेतुम्, लब्धुम्, सोढुम्, आरब्धुम्, पलायितुम्, जनितुम्, मर्तुम्, मन्तुम्।
६. योत्स्यसे, उड्डयिष्यसे, विजेष्यसे, लप्स्यसे, सहिष्यसे, आरप्स्यसे, पलायिष्यसे, जनिष्यसे, मरिष्यसि, मंस्यसे।
८. युद्ध्वा, उड्डीय, विजित्य, लब्ध्वा, सोढ्वा, आरभ्य, पलाय्य, जनित्वा, मृत्वा, मत्वा।

● (ख) १. ह्यः सः अक्षमत, अरमत, अविद्यत, अन्वकम्पत, पर्यैक्षत, प्रत्यैक्षत, अपैक्षत।
(ग) १. ह्यः सः अवन्दत, अवर्तत, अयतत . . .
(घ) १. ह्यः सः अयुध्यत, उदडयत, व्यजयत, अलभत, असहत, आरभत, पलायत, अजायत, अम्रियत, अमन्यत।

# धातुरूपाणि

1. (परस्मैपदी) अद्य अहं पठामि। श्वः अहं पठिष्यामि। आर्य, अहं पठानि ? ह्यः अहम् अपठम्। अहं विधिपूर्वकं पठेयम्।
(आत्मनेपदी) अद्य अहं भाषे। श्वः अहं भाषिष्ये। आर्य, अहं भाषै ? ह्यः अहम् अभाषे। अहं विधिपूर्वकं भाषेय।

2. अद्य आवां पठावः। श्वः आवां पठिष्यावः। आर्य, आवां पठाव ? ह्यः आवाम् अपठाव। आवां विधिपूर्वकं पठेव।
अद्य आवां भाषावहे। श्वः आवां भाषिष्यावहे। आर्य, आवां भाषावहै ? ह्यः आवाम् अभाषावहि। आवां विधिपूर्वकं भाषेवहि।
अद्य वयं पठामः। श्वः वयं पठिष्यामः। आर्य, वयं पठाम ? ह्यः वयम् अपठाम। वयं विधिपूर्वकं पठेम।
अद्य वयं भाषामहे। श्वः वयं भाषिष्यामहे। आर्य, वयं भाषामहै ? ह्यः वयम् अभाषामहि। वयं विधिपूर्वकं भाषेमहि।

3. अद्य यूयं पठथ। श्वः यूयं पठिष्यथ। यूयं पठत। एषः मम आदेशः। ह्यः यूयम् अपठत। यूयं विधिपूर्वकं पठेत।
अद्य यूयं भाषध्वे। श्वः यूयं भाषिष्यध्वे। यूयं भाषध्वम्। एषः मम आदेशः। ह्यः यूयम् अभाषध्वम्। यूयं विधिपूर्वकं भाषेध्वम्।

4. अद्य त्वं पठसि। श्वः त्वं पठिष्यसि। त्वं पठ। एषः मम आदेशः। ह्यः त्वम् अपठः। त्वं विधिपूर्वकं पठेः।
अद्य त्वं भाषसे। श्वः त्वं भाषिष्यसे। त्वं भाषस्व। एषः मम आदेशः। ह्यः त्वम् अभाषथाः। त्वं विधिपूर्वकं भाषेथाः।

5. अद्य ते पठन्ति। श्वः ते पठिष्यन्ति। ते पठन्तु। एषः मम आदेशः। ह्यः ते अपठन्। ते विधिपूर्वकं पठेयुः।
अद्य ते भाषन्ते। श्वः ते भाषिष्यन्ते। ते भाषन्ताम्। एषः मम आदेशः। ह्यः ते अभाषन्त। ते विधिपूर्वकं भाषेरन्।

6. अद्य सः पठति। श्वः सः पठिष्यति। सः पठतु। एषः मम आदेशः। ह्यः सः अपठत्। सः विधिपूर्वकं पठेत्।
अद्य सः भाषते। श्वः सः भाषिष्यते। सः भाषताम्। एषः मम आदेशः। ह्यः सः अभाषत। सः विधिपूर्वकं भाषेत।

7. अद्य तौ पठतः। श्वः तौ पठिष्यतः। तौ पठताम्। एषः मम आदेशः। ह्यः तौ अपठताम्। तौ विधिपूर्वकं पठेताम्।
अद्य तौ भाषेते। श्वः तौ भाषिष्येते। तौ भाषेताम्। एषः मम आदेशः। ह्यः तौ अभाषेताम्। तौ विधिपूर्वकं भाषेयाताम्।

8. अद्य युवां पठथः। श्वः युवां पठिष्यथः। युवां पठतम्। एषः मम आदेशः। ह्यः युवाम् अपठतम्। युवां विधिपूर्वकं पठेतम्।
अद्य युवां भाषेथे। श्वः युवां भाषिष्येथे। युवां भाषेथाम्। एषः मम आदेशः। ह्यः युवाम् अभाषेथाम्। युवां विधिपूर्वकं भाषेयाथाम्।

# परिशिष्टम्

## Know Your Vowels

Do you know that the vowels are 13 in number and they are classified into three groups:

१. अ, इ, उ, ऋ, ऌ । (ह्रस्वाः)

२. आ, ई, ऊ, ॠ । (दीर्घाः)

३. ए, ओ, ऐ, औ । (सन्ध्यक्षराणि) Note the order in which these vowels are listed. Do you know that this order is according to Panini which Sri Aurobindo has adopted and explained in his article 'The Origins of Aryan Speech' ? See the orderly arrangement of the vowels ! The rules that naturally follow are:

Rule No. 1

When a vowel (short or long) is followed by another similar vowel (short or long), the result is a long vowel, e.g., पुष्प+अञ्जलि=पुष्पाञ्जलि। हिम+आलय=हिमालय। विद्या+अभ्यास=विद्याभ्यास। विद्या+आलय=विद्यालय। अति+इव=अतीव। गिरि+ईश=गिरीश। सती+इव=सतीव। सती+ईश=सतीश। सु+उक्ति=सूक्ति। पितृ+ऋण=पितृण।

Rule No. 2

When अ or आ is followed by इ or ई, the result is ए, e.g., देव+इन्द्र=देवेन्द्र। गण+ईश=गणेश। महा+इन्द्र=महेन्द्र। महा+ईश्वर=महेश्वर।

Rule No. 3

When अ or आ is followed by उ or ऊ, the result is ओ, e.g., सूर्य+उदय=सूर्योदय। एक+ऊन=एकोन। महा+उत्सव=महोत्सव। महा+ऊर्मि=महोर्मि।

Rule No. 4

When अ or आ is followed by ए, the result is ऐ, e.g., एक+एक=एकैक। सदा+एव=सदैव।

Rule No. 5

When अ or आ is followed by ओ, the result is औ, e.g., वन+ओषधि=वनौषधि। महा+ओषधि=महौषधि।

*Rule No. 6

When इ or ई is followed by any dissimilar vowel, the result is य्. This occurs naturally in pronouncing the letters. Repeat इ and अ quickly four times and see. Examples: यदि+अपि=यद्यपि। इति+आदि=इत्यादि। प्रति+उत्तर=प्रत्युत्तर।

Rule No. 7

When उ or ऊ is followed by any dissimilar vowel, the result is व्. This occurs naturally. Repeat उ and अ quickly four times and see. Examples: सु+अस्ति=स्वस्ति। कुरु+अन्ति=कुर्वन्ति। सु+आगतम्=स्वागतम्।

---

* Note that till now अ or आ was the base to which other vowels were being added. Here the rule changes. Henceforth other vowels become the base to which अ or आ or any dissimilar vowel is added.

Rule No. 8

Now do the drill. If इ becomes य् by natural movement of the tongue, then ए will be अय् because ए is अ+इ, e.g., ने+अन=न्+ए+अन=न्+(अ+इ)+अन=न्+अ+य्+अन=न्+अय्+अन=नयन।

Rule No. 9

If इ becomes य् by natural movement of the tongue, then ऐ will be आय् because ऐ is अ+ए, e.g., गै+अक=ग्+ऐ+अक=ग्+(अ+ए)+अक=ग्+अ+(अ+इ)+अक=ग्+अ+अ+य्+अक=ग्+आय्+अक=गायक।

Rule No.10

If उ becomes व् by natural movement of the tongue, then ओ will be अव् because ओ is अ+उ, e.g., पो+अन=प्+ओ+अन=प्+(अ+उ)+अन=प्+अ+व्+अन=प्+अव्+अन=पवन।

Rule No.11

If उ becomes व् by natural movement of the tongue, then औ will be आव् because औ is अ+ओ, e.g., भौ+अ=भ्+औ+अ=भ्+(अ+ओ)+अ=भ्+अ+(अ+उ)+अ=भ्+अ+अ+व्+अ=भ्+आव्+अ=भाव।

Rule No.12

When ऋ or ॠ is followed by any dissimilar vowel, the result is र्, e.g., पितृ+आ =पित्+ऋ+आ=पित्+र्+आ=पित्रा। दातृ+ई=दात्+ऋ+ई=दात्+र्+ई=दात्री।

Rule No.13

When a suffix is added to a root or a stem* the vowel undergoes a change which is called गुण or वृद्धि। See the table and the examples given below.

(* Stem is a word without a suffix.)

| | गुणः | सन्धिनियमेन | वृद्धिः | सन्धिनियमेन |
|---|---|---|---|---|
| इ, ई | ए | अय् | ऐ | आय् |
| उ, ऊ | ओ | अव् | औ | आव् |
| ऋ, ॠ | अर् | | आर् | |
| | अ | | आ | |

(क) इ, ई → ए। लिख् – लेखिष्यति, लेखितुम्। नी – नेष्यति, नेतुम्।

(ख) इ, ई → अय्। जि – जयति। नी – नयति।

(ग) इ, ई → ऐ। इष् – ऐच्छत्। ईक्ष् – ऐक्षत।

(घ) ऐ → आय्। ध्यै – ध्यायति। गै – गायति।

(ङ) इ, ई → आय्। चि – चाययति, चायक। नी – नाययति, नायक।

(च) उ, ऊ → ओ। बुध् – बोधिष्यति, बोधितुम्। सू – सोष्यति, सोतुम्।
(छ) उ, ऊ → अव्। भू – भवति, भविष्यति, भवितुम्। स्तु – स्तव।
(ज) उ → औ। स्तु – स्तौति। नु – नौति।
(झ) उ, ऊ → आव्। श्रु – श्रावयति। लू – लावयति।
(ञ) ऋ, ॠ → अर्। कृ – करिष्यति। तॄ – तरिष्यति।
(ट) ऋ, ॠ → आर्। कृ – कारयति। तॄ – तारयति।
(ठ) अ → आ। हस् – हास। वस् – वास। नश् – नाश। पठ् – पाठ।
For details see सुरभारती, पञ्चमः भागः under the title 'शब्दनिर्माणम्'.

*Make sentences using the following:*

1. वद् सत्यम्, असत्यम्, संस्कृतम्, असंस्कृतम्, न्यायम्, अन्यायम्, उचितम्, अनुचितम्, युक्तियुक्तम्, न्यायसङ्गतम्, शुद्धम्, अशुद्धम्, प्रामाणिकम्, शीघ्रम्, मन्दम्, उच्चैः, विस्तरेण, संक्षेपेण, सङ्केतेन, इङ्गितेन, अधिकम्, अल्पम्, सर्वम्, आद्यन्तम्, आ मूलात्, निरर्थकम्/वृथा, अमूलम्, मूढवत्।
2. स्था क्षणम्, क्षणमेकम्, दिनमेकम्, मासमेकम्, वर्षमेकम्, मुहूर्तम्, तूष्णीम्/नीरवम्/निःशब्दम्/समौनम्/मौनेन।
3. बुध् पाठः, प्रश्नः, भाषणम्/प्रवचनम्, विवरणम्, वाक्यम्, अभिप्रायः/उद्देशः, स्पन्दनम्, भावः।
4. प्रच्छ् प्रश्नः, शिक्षकः, अध्यापकः, संरक्षकः, अवेक्षकः, मातुलः, बन्धुः।
5. गम् विद्यालयः, छात्रावासः, आपणः, उद्यानम्, भोजनालयः, पुस्तकालयः, शौचालयः, बन्धुगृहम्, क्रीडाक्षेत्रम्, प्रेक्षालयः, आश्रमः, ग्रामः, नगरम्, वर्गः, चिकित्सालयः, मुद्रणालयः, विदेशः ।
6. क्षिप् कन्दुकः, बाणः, प्रस्तरः, उपलः, यष्टिः/लगुडः, अवकरः, वज्रः, त्रिशूलम्, अस्त्रम्, आग्नेयास्त्रम्।
7. वि-स्मृ गीतम्, श्लोकः, दुःखम्, पुत्रवियोगः/पुत्रविच्छेदः, पुस्तकम्, दत्तं वचनम्।
8. पा फलरसः, तक्रम्, दुग्धम्, चायः, कापेयः, जलम्, पानकम्/मधुपेयम्, अमृतम्, विषम्।
9. दा उत्तरम्, वचनम्, दानम्, धनम्, गालिः, औषधम्, रक्तम्, भोजनम्, वेतनम्, पुरस्कारः, आश्रयः, रूप्यकम्, अनुमतिः, लड्डुकः, शापः, भूमिः, वाहनम्, द्विचक्रम्, वस्त्रम्, रसगोलः, पायसम्, ऋणम्।
10. ग्रह् श्वासः, कन्दुकः, वेतनम्, पुरस्कारः/पारितोषिकम्, ऋणम्, रक्तम्, भोजनम्।
11. इष् धनम्, ज्ञानम्, बुद्धिः, भक्तिः, शक्तिः, मुक्तिः, शान्तिः, तृप्तिः, आनन्दः, सुखम्, सन्तोषः।
12. प्र-नम् गणेशः, शिवः, श्रीकृष्णः, परमेश्वरः, श्रीअरविन्दः, मातृभूमिः/जन्मभूमिः।
13. त्यज् क्रोधः, लोभः, मोहः, मिथ्याचारः, सन्देहः, अभिमानः, गर्वः, अहङ्कारः, आसक्तिः, असत्यभाषणम्।
14. अनु-भू सुखम्, दुःखम्, सन्तोषः, उष्णम्, शीतम्, दौर्बल्यम्, श्वासकष्टम्, भयम्, आनन्दः, शान्तिः।
15. प्र-विश् गृहम्, कक्षः, विद्यालयः, आश्रमः, वर्गः, राजभवनम्, मन्दिरम्।
16. सं-वृ मुखम्, द्वारम्, वातायनम्, धायः।
17. क्री वस्त्रम्, छत्रम्, धौतम्, युतकम्, ऊरुकम्, आङ्गिकम्, कम्बलः, अङ्गवस्त्रम्, शय्याच्छदः, पत्रम्, बागोलः, हारः, कुद्दालः, पुष्पम्, फलम्, यानम्, प्रशीतकम्, प्रसेवः, स्योतम्, औषधम्, गृहम्, उद्घर्षणम्, उपधिः, आसनम्, धायः, पटलम्।
18. प्राप् धनम्, पुरस्कारः, अपमानः, गालिः/तिरस्कारः, ज्ञानम्, उपहारः, आनन्दः, सन्तोषः, शान्तिः, सम्मानः, लक्ष्यम्।
19. लिख् (a) लेखः, अर्थः, निबन्धः/प्रबन्धः, इतिहासः, नाटकम्, गीतम्, पद्यम्, काव्यम्। (b) सुचारु, अचारु, विषमम्, समम्, स्पष्टम्, अस्पष्टम्, सुवाच्यम्/सुपाठ्यम्, अवाच्यम्/अपाठ्यम्/दुर्वाच्यम्।

20. दृश् (a) भाचित्रम्, चलचित्रम्, दूरदर्शनम्, श्रवालोकः, आकाशः, सूर्यः, चन्द्रः, नक्षत्रम्, उपग्रहः, विमानः, धूमकेतुः, पर्वतः, समुद्रः, तडागः, समाधिः, पुष्पम्, उद्यानम्, वृक्षः, पुस्तकम्, देवः, मातुलः। (b) पिता, माता, भ्राता, आत्मा, भगवान्, हनूमान्। (c) वामम्, दक्षिणम्, पुरः/पुरतः, पश्चात्/पृष्ठतः, ऊर्ध्वम्, अधः/अधस्तात्, उपरि, नीचैः, परितः, सर्वतः।

21. ज्ञा (a) पत्रसङ्केतः, अर्थः, भावार्थः, तात्पर्यम्/गूढार्थः, पाठः, मार्गः, उपायः, रहस्यम्, उत्तरम्, समाचारः/वृत्तम्, चरित्रम्, स्वभावः, सङ्गीतम्, नृत्यम्, गीतम्, भूतम्, भविष्यम्, वर्तमानम्, स्तोत्रम्।
(b) पर्याप्तम्, सर्वम्, सम्पूर्णम्, अल्पम्, अधिकम्, किमपि न, किञ्चित्, अर्धम्, बहु।

22. स्पृश् (a) मस्तकम्, शरीरम्, हस्तः, पादः, अङ्गुष्ठः, ललाटम्, पृष्ठम्, उदरम्, कर्णः, गुम्फः, स्कन्धः, कण्ठः, अङ्गुलिः, चिबुकम्, कपोलः। (b) कनिष्ठिका, अनामिका, मध्यमा, तर्जनी, नासिका, वेणी।

23. आ-नी (a) स्योतम्, कन्दुकः, उपधिः, पटलम्, भोजनम्, दुग्धम्, चायः, कापेयः, मिष्टान्नम्, पुस्तकम्, पुष्पम्, धूपः, जलम्, द्विचक्रम्, धनम्, पात्रम्, प्रसेवः। (b) लेखनी, अङ्कनी, शर्करा। (c) पुस्तकालयः, आपणः, वर्गः, धायः, भोजनालयः, गृहम्, उपाहारगृहम्, अल्पाहारगृहम्।

24. गै (a) गीतम्, कविता। (b) स्वरेण, विस्वरम्, तालेन, वितालम्, मधुरम्, रुचिरम्, मनोहरम्।

25. स्वप् (a) रात्रिकालः, मध्याह्नः, अपराह्णः, सन्ध्याकालः/सन्ध्यासमयः, असमयः।
(b) अष्ट होराः, बहुकालम्, गाढम्, शान्त्या, दिवा, सायम्।

26. आ-ह्वे (a) बन्धुः, मित्रम्, चिकित्सकः, शिक्षकः। (b) भोजनम्, पठनम्, भ्रमणम्।

## Answers

1-2 No change. Use the words as they are, e.g., अहं सत्यं वदामि। सः उच्चैः वदति। अहं क्षणं तिष्ठामि। You may change the verbal form in different tenses and moods. You may also change the gender and number of the subject.

3. Replace विसर्ग by म् if the word ends in विसर्ग, e.g., अहं पाठं बोधामि। No change needed for words ending in म्, e.g., त्वं मम भाषणम् अबोधः ?

4-18 As in No. 3. The verbal forms are : (4) पृच्छामि, (5) गच्छामि, (6) क्षिपामि, (7) विस्मरामि, (8) पिबामि, (9) ददामि, (10) गृह्णामि, (11) इच्छामि, (12) प्रणमामि, (13) त्यजामि, (14) अनुभवामि, (15) प्रविशामि, (16) संवरामि, (17) क्रीणामि, (18) प्राप्नोमि।

19. लिखामि (a) As in No. 3. (b) No change. Use the words as they are.

20. पश्यामि (a) As in No. 3. (b) पितरम्, मातरम्, भ्रातरम्, आत्मानम्, भगवन्तम्, हनूमन्तम्। (c) No change.

21. जानामि (a) As in No.3. (b) No change. Use the words as they are.

22. स्पृशामि (a) As in No. 3. (b) Add म्, e.g., कनिष्ठिकाम्, तर्जनीम्।

23. आनयामि (a-b) As in No. 22. (c) Replace विसर्ग and म् by आत्, e.g., पुस्तकालयात्, गृहात्।

24. (a) गीतं गायामि। कवितां गायामि। (b) No change. Use the words as they are.

25. स्वपिमि (a) Replace विसर्ग by ए, e.g., रात्रिकाले, मध्याह्ने। (b) No change.

26. आह्वयामि। (a) As in No. 3. (b) Replace म् by आय, e.g., भोजनाय, पठनाय, भ्रमणाय।

## भविष्यत्, तुम्, त्वा

(दा) दानम् – दास्यामि, दातुम् इच्छामि, दत्त्वा आगच्छामि। (दत्त)
(ज्ञा) ज्ञानम् – ज्ञास्यामि, ज्ञातुम् इच्छामि, ज्ञात्वा आगच्छामि। (ज्ञात)
(घ्रा) घ्राणम् – घ्रास्यामि, घ्रातुम् इच्छामि, घ्रात्वा आगच्छामि। (घ्रात)

(स्ना) स्नानम् – स्नास्यामि, स्नातुम् इच्छामि, स्नात्वा आगच्छामि। (स्नात)
(ध्यै) ध्यानम् – ध्यास्यामि, ध्यातुम् इच्छामि, ध्यात्वा आगच्छामि। (ध्यात)
(स्था) स्थानम् – स्थास्यामि, स्थातुम् इच्छामि, स्थित्वा आगच्छामि। (स्थित)
(गै) गानम् – गास्यामि, गातुम् इच्छामि, गीत्वा आगच्छामि। (गीत)
(पा) पानम् – पास्यामि, पातुम् इच्छामि, पीत्वा आगच्छामि। (पीत)
(आ-ह्वे) आह्वानम् – आह्वास्यामि, आह्वातुम् इच्छामि, आहूय आगच्छामि। (आहूत)

| | | | | | | |
|---|---|---|---|---|---|---|
| स्मृ | स्मरिष्यामि | स्मर्तुम् | इच्छामि | स्मृत्वा | आगच्छामि | (स्मृत) |
| कृ | करिष्यामि | कर्तुम् | ,, | कृत्वा | ,, | (कृत) |
| धृ | धरिष्यामि | धर्तुम् | ,, | धृत्वा | ,, | (धृत) |
| हृ | हरिष्यामि | हर्तुम् | ,, | हृत्वा | ,, | (हृत) |
| तृ | तरिष्यामि | तरितुम् | ,, | तीर्त्वा | ,, | (अवतीर्ण) |
| नृत् | नर्तिष्यामि | नर्तितुम् | ,, | नर्तित्वा | ,, | *(नृत्त)* |
| मन्थ् | मन्थिष्यामि | मन्थितुम् | ,, | मन्थित्वा | ,, | *(मन्थित)* |
| वद् | वदिष्यामि | वदितुम् | ,, | उदित्वा | ,, | (अनूदित) |
| लिख् | लेखिष्यामि | लेखितुम् | ,, | लिखित्वा | ,, | (लिखित) |
| मिल् | मेलिष्यामि | मेलितुम् | ,, | मिलित्वा | ,, | (सम्मिलित) |
| बुध् | बोधिष्यामि | बोधितुम् | ,, | बुधित्वा | ,, | *(बुधित)* |
| श्रु | श्रोष्यामि | श्रोतुम् | ,, | श्रुत्वा | ,, | (श्रुत) |
| चि | चेष्यामि | चेतुम् | ,, | चित्वा | ,, | (परिचित) |
| जि | जेष्यामि | जेतुम् | ,, | जित्वा | ,, | (पराजित) |
| क्री | क्रेष्यामि | क्रेतुम् | इच्छामि | क्रीत्वा | आगच्छामि | (विक्रीत) |
| नी | नेष्यामि | नेतुम् | ,, | नीत्वा | ,, | (अभिनीत) |
| नुद् | नोत्स्यामि | नोत्तुम् | ,, | नुत्त्वा | ,, | *(नुत्त)* |
| क्षिप् | क्षेप्स्यामि | क्षेप्तुम् | ,, | क्षिप्त्वा | ,, | (विक्षिप्त) |
| स्वप् | स्वप्स्यामि | स्वप्तुम् | ,, | सुप्त्वा | ,, | (सुप्त) |
| प्र-आप् | प्राप्स्यामि | प्राप्तुम् | ,, | प्राप्य | ,, | (प्राप्त) |
| त्यज् | त्यक्ष्यामि | त्यक्तुम् | ,, | त्यक्त्वा | ,, | (त्यक्त) |
| मुच् | मोक्ष्यामि | मोक्तुम् | ,, | मुक्त्वा | ,, | (मुक्त) |
| आ-रुह् | आरोक्ष्यामि | आरोढुम् | ,, | आरुह्य | ,, | **(आरूढ)** |
| प्र-विश् | प्रवेक्ष्यामि | प्रवेष्टुम् | ,, | प्रविश्य | ,, | (प्रविष्ट) |
| आ-दिश् | आदेक्ष्यामि | आदेष्टुम् | ,, | आदिश्य | ,, | (आदिष्ट) |
| स्पृश् | स्प्रक्ष्यामि | स्प्रष्टुम् | ,, | स्पृष्ट्वा | ,, | (स्पृष्ट) |
| कृष् | क्रक्ष्यामि | क्रष्टुम् | ,, | कृष्ट्वा | ,, | (आकृष्ट) |
| दृश् | द्रक्ष्यामि | द्रष्टुम् | ,, | दृष्ट्वा | ,, | (दृष्ट) |
| प्रच्छ् | प्रक्ष्यामि | प्रष्टुम् | ,, | पृष्ट्वा | ,, | (पृष्ट) |
| गम् | गमिष्यामि | गन्तुम् | ,, | गत्वा | ,, | (गत) |
| नम् | नंस्यामि | नन्तुम् | ,, | नत्वा | ,, | (नत) |

| | | | | | | |
|---|---|---|---|---|---|---|
| ग्रह् | ग्रहीष्यामि | ग्रहीतुम् | इच्छामि | गृहीत्वा | आगच्छामि | (गृहीत) |
| भू | भविष्यामि | भवितुम् | " | भूत्वा | " | (भूत) |
| अनु-भू | अनुभविष्यामि | अनुभवितुम् | " | अनुभूय | " | (अनुभूत) |
| बन्ध् | भन्त्स्यामि | बन्धुम् | " | बद्ध्वा | " | (बद्ध) |

## Clarifications

1. (क) न् changes to ण् if it is preceded by ऋ or र or ष even if there are intervening vowels and consonants of कवर्ग, पवर्ग and ह, य, व, e.g., नरेण, ऋषिणा, रघुणा, दर्पेण, पुष्पेण, वराहेण, विषयेण, राघवेण, but देवेन, मुनिना, भरतेन, कृष्णेन, अर्थेन।

   (ख) This rule does not apply if the न् is the final letter of the word, e.g., रामान्, ऋषीन्, हे करिन्!

2. The following are avyayas. Suffixes are not added to them.
   अत्र, तत्र, कुत्र, यत्र, सर्वत्र, अन्यत्र, एकत्र, यदा, तदा, कदा, सदा, सर्वदा, एकदा, अधुना, किंवा, वा, अथवा, मा, पुरा, दिवा, विना, यथा, तथा, मिथ्या, सर्वथा, सहसा। अथ, न, च, सह, अद्य, अतीव, हि, अपि, इव, यदि, तर्हि, तु, किन्तु, परन्तु, खलु, एव, इति, इह, उपरि, प्रति, सम्प्रति ।

3. म् changes to अनुस्वार if it is followed by a consonant.

4. Nowadays scholars make no difference between the words एषः and अयम्, एषा and इयम्, एतत् and इदम् meaning 'this'.

5. तत्, यत्, एतत्, अन्यत्, किम्, इदम् are used as subjects and objects in neuter gender, e.g., एतत् पुस्तकम्। एतत् पुस्तकं पठ। इदम् आम्रं न मधुरम्। इदम् आम्रं न खाद।

6. (पुं, स्त्री) अ इ उ ऊ → :
   The विसर्ग is added to the words ending in अ, इ, उ, ऊ in masculine and feminine gender in the nominative case singular number.

7. स and एष keep their विसर्ग if they are followed by a word beginning with अ or if they happen to be at the end of a sentence. In all other cases the विसर्ग can be dropped. But in poetry, the सन्धि being compulsory, स and एष always drop their विसर्ग if they are followed by a word beginning with any letter other than अ.

8. The स in a suffix changes to ष if it is preceded by any vowel other than अ or आ, e.g., मुनिषु, साधुषु, पितृषु, देवेषु, गोषु, करोषि, but पठसि, पश्यसि, ददासि, लतासु।

9. If there is a prefix before a root, the अ of the past tense (भूतकाल) is placed before the root, not before the prefix. विशामि – अविशम्। उपविशामि – उप+अविशम् = उपाविशम्।

10. स्म is added to the verbs in the present tense to denote a continuous or repeated action in the past, e.g., अहं बाल्यकाले संस्कृतम् उत्साहेन पठामि स्म। तदाहं संस्कृतात् न दरामि स्म। शिक्षकः मां प्रेम्णा पाठयति स्म। सः मम भाषणस्य अभ्यासं कारयति स्म।

11. य is used in place of त्वा if the root has a prefix, e.g., भू → भूत्वा, अनु-भू → अनुभूय। सृ → सृत्वा, अनु-सृ → अनुसृत्य। स्मृ → स्मृत्वा, वि-स्मृ → विस्मृत्य।

# FOR THE TEACHERS

1. The following names with different endings may be used for further practice of lessons 6 (Table A below) and 12 (Table B).

| A |
|---|
| गोविन्द, गणेश, सुरेश, गोपाल, नारायण, दिलीप, निखिल, जगन्नाथ, प्राञ्जल। |
| गीता, वन्दना, ज्योत्स्ना, सुधा, सुस्मिता, उपासना, उमा, नम्रता, अनुराधा, मीरा। |
| स्वाति, कीर्ति, स्तुति, सुमति, प्रीति, ऋद्धि, आरति, प्रणति, सुरुचि, सुकान्ति। |
| देवकी, मन्दाकिनी, गौरी, गायत्री, सावित्री, माधुरी, भारती, मालती, जाह्नवी। |
| सत्यजित्, विश्वजित्, सुकृत्, सम्पद्। |
| हरि, महर्षि, श्रीपति, राजर्षि, दयानिधि। |
| यदु, शान्तनु, श्रद्धालु, प्रभु, कृपासिन्धु। |

| B | |
|---|---|
| अ | युवक, वृद्ध, छात्र, भक्त, अन्ध, दरिद्र, वृक्ष, ग्राम, मार्ग, श्लोक, लड्डुक। |
| आ | वृद्धा, छात्रा, भक्ता, अन्धा, दरिद्रा, कथा, जवा, कविता, भाषा, माला, शाखा। |
| इ | मूर्ति, सिद्धि, जाति, ज्ञाति, विपत्ति। |
| ई | देवी, सखी, लेखनी, नदी, शाटी, नगरी। |
| इन् | योगिन्, ज्ञानिन्, सन्यासिन्, प्रतिवेशिन्। |
| ऋ | नेतृ, अभिनेतृ, दातृ, श्रोतृ, वक्तृ, ज्ञातृ।* |
| इ | मुनि, ऋषि, सेनापति, कपि, कवि। |
| उ | बन्धु, साधु, गुरु, शत्रु, सेतु, ऋतु, तरु। |

* इमे नेतारः। इमं नेतारम्।

2. Match the authors in Section A to their works given in Section B, e.g.,

व्यासदेवः कः ? त्वं व्यासदेवं जानासि ? व्यासदेवेन किं रचितम् ? व्यासदेवस्य रचना का ? व्यासदेवः महाभारतस्य रचयिता। पाणिनिः/सुबन्धुः/विष्णुशर्मा कः ? पाणिनिं/सुबन्धुं/विष्णुशर्माणं जानासि ? पाणिनिना/सुबन्धुना/विष्णुशर्मणा किं रचितम् ? पाणिनेः/सुबन्धोः/विष्णुशर्मणः रचना का ? पाणिनिः अष्टाध्याय्याः रचयिता। सुबन्धुः वासवदत्तायाः रचयिता। विष्णुशर्मा पञ्चतन्त्रस्य रचयिता।

| A | B |
|---|---|
| 1व्यासदेव, 2कालिदास, 3भरत, 4जगन्नाथ, 5चाणक्य, 6शूद्रक, 7विश्वनाथ, 8भास, 9बाण, 10वाल्मीकि, 11पाणिनि, 12सुबन्धु, 13पतञ्जलि, 14भवभूति, 15भट्टोजीदीक्षित, 16विष्णुशर्मा (विष्णुशर्मन्), 17दण्डी (दण्डिन्)। | 17दशकुमारचरितम्, 16पञ्चतन्त्रम्, 15सिद्धान्तकौमुदी, 14उत्तररामचरितम्, 13महाभाष्यम्, 12वासवदत्ता, 11अष्टाध्यायी, 10रामायणम्, 9कादम्बरी, 8स्वप्नवासवदत्तम्, 7साहित्यदर्पणः, 6मृच्छकटिकम्, 5अर्थशास्त्रम्, 4रसगङ्गाधरः, 3नाट्यशास्त्रम्, 2शाकुन्तलम्, 1महाभारतम्। |

3. The students may be asked to use the declined forms of all the pronouns learnt in lessons 6 and 12 as a monologue and dialogues, e.g., (क) अहं कः ?[1] मां न जानासि ?[2] मया सह कलहं मा कुरु।[3] मह्यं गालिं मा देहि।[4] मत् दूरं तिष्ठ।[5] मम निकटं न आगच्छ।[6] मयि अग्निर् ज्वलति। सावधानम्।[7]

Who am I ? 2. You don't know me ? 3. Don't quarrel with me. 4. Don't scold me. 5. Stay away from me. Don't come near me. 7. Fire is burning in me. Be careful.

अहं कः ? त्वं भरतः। मां न जानासि ? त्वां सम्यक् जानामि। मया सह कलहं मा कुरु। अहं त्वया सह कलहं न करोमि। त्वं मया सह कलहं करोषि। मह्यं गालिं मा देहि। अहं तुभ्यं गालिं न ददामि। त्वं मह्यं गालिं ददासि। मत् दूरं तिष्ठ। अहं त्वत् दूरं तिष्ठामि। त्वं मत् दूरं तिष्ठ। मम निकटं न आगच्छ। अहं तव निकटं न गच्छामि। त्वं मम निकटं न आगच्छ। मयि अग्निर् ज्वलति। सावधानम्। त्वयि अग्निर् ज्वलति ? त्वयि सत्यम् अग्निर् ज्वलति ? कुत्र ? दर्शय।

सः कः ? सा का ? तं न जानासि ? तां न जानासि ? तेन सह कलहं मा कुरु। तया सह कलहं मा कुरु। तस्मै गालिं मा देहि। तस्यै गालिं मा देहि। तस्मात् दूरं तिष्ठ। तस्याः दूरं तिष्ठ। तस्य निकटं न गच्छ। तस्याः निकटं न गच्छ। तस्मिन् अग्निर् ज्वलति। सावधानम्। तस्याम् अग्निर् ज्वलति। सावधानम्।

अयं कः ? इयं का ? इमं न जानासि ? इमां न जानासि ? अनेन सह कलहं मा कुरु। अनया सह कलहं मा कुरु। अस्मै गालिं मा देहि। अस्यै गालिं मा देहि। अस्मात् दूरं तिष्ठ। अस्याः दूरं तिष्ठ। अस्य निकटं न आगच्छ। अस्याः निकटं न आगच्छ। अस्मिन् अग्निर् ज्वलति। सावधानम्। अस्याम् अग्निर् ज्वलति। सावधानम्।

(ख) यूयं के ? वयं छात्राः। यूयम् अस्मान् न जानीथ ? वयं युष्मान् सम्यक् जानीमः। यूयम् अस्माभिः सह कलहं न कुरुत। वयं युष्माभिः सह कलहं न कुर्मः। यूयम् अस्माभिः सह कलहं कुरुथ। यूयम् अस्मभ्यं गालिं न दत्त। वयं युष्मभ्यं गालिं न दद्मः। यूयम् अस्मभ्यं गालिं दत्थ। यूयम् अस्मत् दूरं तिष्ठत। वयं युष्मत् दूरं तिष्ठामः। यूयम् अस्मत् दूरं तिष्ठत। यूयम् अस्माकं निकटं न आगच्छत। वयं युष्माकं निकटं न गच्छामः। यूयम् अस्माकं निकटं न आगच्छत। अस्मासु अग्निर् ज्वलति। सावधानम्। युष्मासु अग्निर् ज्वलति ? युष्मासु सत्यम् अग्निर् ज्वलति ? कुत्र ? दर्शयत।

ते के ? ताः काः ? यूयम् तान् न जानीथ ? यूयं ताः जानीथ ? यूयं तैः सह कलहं न कुरुत। यूयं ताभिः सह कलहं न कुरुत। यूयं तेभ्यं गालिं न दत्त। यूयं ताभ्यः गालिं न दत्त। यूयं तेभ्यः दूरं तिष्ठत। यूयं ताभ्यः दूरं तिष्ठत। यूयं तेषां निकटं न गच्छत। यूयं तासां निकटं न गच्छत। तेषु अग्निर् ज्वलति। सावधानम्। तासु अग्निर् ज्वलति। सावधानम्।

इमे के ? इमाः काः ? यूयम् इमान् न जानीथ ? यूयम् इमाः जानीथ ? यूयम् एभिः सह कलहं न कुरुत। यूयम् आभिः सह कलहं न कुरुत। यूयम् एभ्यः गालिं न दत्त। यूयम् आभ्यः गालिं न दत्त। यूयम् एभ्यः दूरं तिष्ठत। यूयम् आभ्यः दूरं तिष्ठत। यूयम् एषां निकटं न आगच्छत। यूयम् आसां निकटं न आगच्छत। एषु अग्निर् ज्वलति। सावधानम्। आसु अग्निर् ज्वलति। सावधानम्।

4. Here are some ways by which the students can be shown to put to practical use the lesson just learnt:

<u>Lesson 2</u> : A student rings up another student. After the customary greetings, he informs the other as to why he will not be able to meet him this evening.

<u>Lesson 3</u> : Each student introduces himself and his family using the words and phrases learnt in lessons 1, 2, 3.

<u>Lesson 4</u> : Each student describes his daily routine.

<u>Lesson 5</u> : (a) Each student describes what he did last Sunday, using different times, e.g., I woke up at 5.45 a.m., I did my homework from 6 a.m. to 7.15 a.m., etc. (b) Each student describes what he plans to do during the coming holidays.

<u>Lesson 6</u> : The teacher collects an object from each student, e.g., a ruler, an eraser, a note-book etc. and places them on his table. He picks up one at random and holds it up. The student to whom it belongs lifts up his hand. His neighbour must say whose it is, e.g., सः रवेः रेखकः। तत् कवितायाः उद्घर्षणम्।

<u>Lesson 7</u> : Have the students engage in dialogues in which one asks another for advice and the other lists out the do's and don'ts using the imperative mood, e.g., मिष्टान्नं मा खाद। सूर्योदयात् पूर्वम् उत्तिष्ठ। प्रातः भ्रमणं कुरु। One could vary by using I, we, he, she, my brother, my sister, etc.

<u>Lesson 8</u> : The students may be grouped in batches of 3 and made to converse in complete sentences along the following lines : Student A proposes a course of action, Student B accepts and Student C refuses giving reasons, e.g., Student A: निकटे उत्तमम् उपाहारगृहम् अस्ति। अहं भोजयितुम् इच्छामि। कः गन्तुम् इच्छति ? Student B : अहं जानामि। मूल्यम् अपि साधारणम्। अहं गन्तुम् इच्छामि। Student C : अहं न गमिष्यामि। माता बहिर्भोजनं निषिद्धवती। क्षम्यताम्, अहं गन्तुं न शक्नोमि।

<u>Lesson 9</u> : (a) The teacher can ask the students to give the number of different objects in the classroom in complete sentences. (b) The teacher writes two numbers on the board and asks the students to add or subtract them.

<u>Lesson 10</u> : (a) Ask the students to describe someone using adjectives learnt, e.g., the appearance of his brother/sister to his friend who is supposed to receive him/her at the Railway Station. (b) Describe your best friend's physical and psychological traits.

<u>Lesson 11</u> : Have the students describe a recent trip or picnic.

<u>Lesson 13</u> : Have two students enact a dialogue in which one of them had failed to turn up for an appointment on the previous day.

The best thing would be to tell them a story, using very simple words and phrases so that they can understand (a little story, short and interesting or amusing), and then afterwards ask them to write down in class what they have heard.

MCW 12 : 331 — The Mother

# शब्दार्थः

(Page Nos. 2, 48, 49, 53, 58, 59)

| | |
|---|---|
| अङ्कनी | pen |
| अधः | below |
| अनुद्यमः | अप्रयत्नशीलः |
| अवकरः | dirt |
| अवेक्षकः | caretaker |
| आङ्गिकम् | vest |
| आपणः | shop |
| आपद् | danger |
| इङ्गितम् | gesture |
| इष् (इच्छति) | to wish |
| उद्घर्षणम् | eraser |
| उद्देशः | intention |
| उपधिः *m.* | chair |
| उपलः | pebble |
| उशना | शुक्राचार्यः |
| ऊरुकम् | shorts |
| कम् | जलम् |
| कनकम् | स्वर्णम् |
| कन्दुकः | ball |
| कलापः | समूहः |
| कलिः | कलहः |
| कापेयः | coffee |
| खटी | chalk |
| खलः | दुर्जनः |
| गुम्फः | moustache |
| घ्रा (जिघ्रति) | to smell |
| चि (चिनोति) | to pluck |
| जलरुहम् | पद्मम् |
| जवेन | वेगेन |
| तनयः | पुत्रः |
| तुरगः | घोटकः, अश्वः |
| तूर्णम् | शीघ्रम् |
| त्रिपुरान्तकारी | शिवः |
| त्यक्तलज्जः | लज्जात्यागी |
| दैवज्ञः | astrologer |
| द्विचक्रम् | bicycle |
| धनाढ्यः | धनिकः, धनी |
| धनेशः | कुबेरः |
| धरणिपतिः | राजा |
| धायः | almirah |
| धारा | धारानगरी |
| धौतम् | *dhoti* |
| नगेशः | हिमालयः |
| नमस्कृताम् | प्रणतानाम् |
| नागः | हस्ती |
| नुद् (नुदति) | to push |
| नु (नौति) | नमति |
| पटलम् | table |
| परा | परमा |
| परितः | around |
| परेषाम् | अन्येषाम् |
| पातकम् | पापम् |
| पानकम् | drink |
| पूजयंल्लोके | पूजयन्+लोके |
| पूर्णेन्दुः | पूर्णचन्द्रः |
| प्रणश्यति | नष्टः भवति |
| प्रमदा | स्त्री |
| प्रयोगशाला | laboratory |
| प्रशाला | hall |
| प्रशीतकम् | refrigerator |
| प्रसेवः | bag (big size) |
| प्रेक्षालयः | theatre |
| भजनिता | भक्तिः |
| भाचित्रम् | photo |
| भाति/विभाति | शोभते |
| भूमिसुतः | मङ्गलग्रहः |
| भूषणम् | अलङ्कारः |
| मदः | गर्वः, हस्ति-कपोल-जलम् |
| मनस्करः | मनोवाञ्छापूरयिता |
| महः *n.* | अतिमानस-ज्योतिः |
| महेश्वरः | महान् प्रभुः |
| मुदाकरः | आनन्दजनकः |
| मुद्रणालयः | printing press |
| मुरारिः | विष्णुः |
| यतस्व | यत्नं कुरु |
| युतकम् | shirt |
| रामः | परशुरामः |
| लेखनी | pen |
| वलयः | bangle |
| वसुधा | पृथिवी |
| वागोलः | ballon |
| विनिपातित | हत, मारित |
| विबुधः | ज्ञानी |
| विभुः | राजा |
| विलसतु | शोभताम् |
| विवरणम् | report |
| वृष्णीनाम् | वृष्णीवंशीयानाम् |
| व्यभिचारः | कुकार्यम् |
| शय्याच्छदः | bedcover |
| शरण्ये | हे शरणदात्रि |
| शर्वरी | रात्रिः |
| शीलेन | सदाचारेण |
| श्रवालोकः | video |
| सं-वृ (संवरति) | to close |
| संरक्षकः | guardian |
| सत्यसन्धः | सत्यप्रतिज्ञः |
| सारय | प्रसारय |
| सुरभाषा | देवभाषा, संस्कृतम् |
| स्योतम् | bag |